# कीर्तिसेना





नागमङ्गलनरसिंहाचार्यः



# नागमङ्गलनरसिंहाचार्यः

अयं लौहितगोत्रः आश्वलायनसूत्रः ऋक्शाखाध्यायी श्रीनिवासार्यस्य पुत्रः। माता सौम्यनायकी। भ्रातरः चत्वारोऽपि संस्कृत-कन्नड-तमिळ्-उर्दू-प्रभृति-भाषासु पण्डिताः सङ्गीतज्ञाः चित्रकलाशिल्पविदः नागरिक-कलाकुशलाश्च। सालग्रामशिलावत् कृष्णतरवर्णाः स्निग्धाः सुन्दराङ्गा इमे भारतस्वातंत्र्यसङ्ग्रामे शूराः सैनिकाः सैनिकसम्पादकाश्च। अयमपि तथैव। बाल्ये नागमङ्गले वाणीभूषणसंस्कृपाठशालायां अधीत्य ततः मैसूरु महाराजसंस्कृतपाठशालायां तर्कं अलंकारं च अधीतवान्। १६१० क्रिश वर्षे जन्म, १६५६ वर्षे मरणम्। अयं गान्धीमहात्मना हिन्दीविशारदपदे मद्रास् नगरे सम्मानितश्च। तुमकूरुमण्डले कन्नडसंस्कृतांग्लहिन्दी अध्यापकत्वेन कर्म कुर्वन् आसीत्। सिद्धगङ्गासंस्कृतपाठशालायां तन्मठस्वामिनां अपि शिक्षकत्वेन कंचिन् कालं आसीत्। कञ्चित् कालं तिरुपतिवेंकटेश्वरस्य भगवतः अन्तरङ्गाभिषेकादिसेवां कुर्वन् आसीत्। एतेन रचिताः उपलभ्यमानाः ग्रन्थाः एते

१ कीर्तिसेना - संस्कृतसरलगद्यकथा
२ कनकावती - ऐतिहासिकं संस्कृतखण्डकाव्यम्
३ दयाशतकस्तोत्रस्य कन्नडानुवादः
४ श्रीवेंकटेश्वर सुप्रभातस्तोत्रादीनां कन्नडानुवादः
५ प्रपन्नामृताख्यस्य चारित्रिकग्रन्थस्य कन्नडानुवादः
६ वार्तामालाख्यस्य वैबल्सदृशस्य द्राविडग्रन्थस्यानुवादः।

# कीर्तिसेना

(सरलगद्यकथा)

**रचयिता**

नागमङ्गलाभिजनः लौहितगोत्रः **नरसिम्हाचार्यः**
तर्कालङ्कारविद्वान्, कन्नडपण्डितः, उर्दू हिन्दी विशारदः,
भारतस्वातंत्र्यसंग्रामवीरश्च
मैसूरु श्रीमन्महाराजसंस्कृतमहापाठशालाविद्यार्थी क्रिश-१९३०-१९४५

सम्पादकः
**अरैयर् श्रीरामशर्मा** - प्रांशुपालः
वेदवेदान्तबोधिनी संस्कृतमहाविद्याशाला मेलुकोटे-५७१ ४३१

संस्कृतवर्षप्रकाशनम्

प्रकाशकाः
**ग्रन्थकर्तुः पुत्रीपुत्रबान्धवाः**

KEERTHISENA - A Shorty Story Rendered in Sanskrit By
**Namangalam Narasimhacharya,** Pages : 52 + 2 = 54

Copy Rights : Editor

**Price : Rs. 40/-**

Printed by : S. Chandrashekar
Charrithra Printers, 8th Cross
Ramanuja Road, Mysore- 570-004

## कीर्तिसेना भूमिका

### (1) कथासाहित्यस्य आकरग्रन्थाः

आस्माकं भारतराष्ट्रस्य केवलं न, किन्तु विश्वस्यापि सभ्यतायाः उपदेशकाः सद्ग्रन्थाः प्रायः रामायणं भारतं बृहत्कथा चेति। धर्मः अर्थः कामः इति लौकिकसभ्यतायाः त्रयः प्रकाराः। धर्मस्य रामायणम् अर्थस्य महाभारतम् इष्टकामस्य बृहत्कथा इति तत्तत्-प्राधान्येन त्रयः आकरग्रन्थाः भारतराष्ट्रस्य सर्वस्वभूताः। इतिहास एव त्रयाणां मूलविषयः। एकव्यक्तिप्रधानेतिहासः रामायणं महाकाव्यम्। बहुव्यक्तिसमूहरूप समाजेतिहासप्रधानं महाभारतं काव्यं शास्त्रं च। ऐतिहासिक-व्यक्तिविशेषान् आश्रित्य अद्भुतकथाप्रधानं बृहत्कथाकाव्यम्। अत्र कथा आख्यायिका इति विभागद्वयं भवति। कथासु इतिहासांशः अप्रधानो भवति आख्यायिकासु इतिहासांशः पृष्ठवंशास्थिवत् अन्तः प्रधानो भवति।

ये स्वजीवने मूर्खत्वमेव इच्छन्ति तेषां एतद्ग्रन्थाध्ययनं नैव आवश्यकम्। ये तु धर्मार्थकामविशेषेषु अज्ञाः ज्ञातुं कुतूहलिनश्च, तेषां इमे ग्रन्थाः बुद्धिशिक्षणे समर्थाः राजवत् पूज्यत्वं समाजनेतृत्वं सुखजीवनं च कल्पयन्ति। मूर्खा अपि एतन्मार्गेण उपदिष्टाः मूर्खत्वं त्यक्त्वा सभ्याः भवन्ति। अत्रास्माकं आन्तरौ श्लोकौ भवतः।

**रामायणं महाकाव्यं भारतं च बृहत्कथा।**
**त्रिवर्गमुखरा मूर्खैः त्रयीव न हि सेव्यते ॥**
**अपूर्वं अश्रुतं चैतत् शर्वोपज्ञं अनुश्रुतम्।**
**बृहत्कथाऽद्भुतं नाम श्रीभारतनृपश्रिये ॥** इति।

### (2) मूलबृहत्कथा भाषा

इयं बृहत्कथा तु संस्कृत-प्राकृत-अपभ्रंश-जन्यायां पैशाचाख्यायां नागभाषायां आसीत्। भारतवर्षे केषांचित् प्रदेशानां पिशाचदेशाः इति

पुराणेषु व्यवहारः अस्ति। आफघानिस्थाने बलूचिस्थाने काश्मीरे नेपाळे ब्रह्मदेशे विन्ध्यप्रान्ते दक्षिणापथदेशेषु सिंहळादिषु द्वीपेष्वपि पैशाचभाषिकाः जनाः आसन्। एतेषां नागाः अरवाः इत्यपि नामान्तरं अस्ति। द्राविडेषु 'अरवु' इति मूलभाषा काचित् आसीत्। इयमेव नागभाषा पैशाचभाषा इति वैय्याकरणैः व्यवहृता। अस्याः भाषायाः व्याकरणसूत्राणि षट्प्राकृतेषु वररुचिमहर्षिरचितानि उपलभ्यन्ते। 'अरवु' इति द्राविडे नागाः सर्पाश्च उच्यन्ते। नागानां स्वभावः येषु जनेषु तेषां अद्यतन्यः गिरिजनभाषाश्च पैशाचस्य रूपान्तराणीव दृश्यन्ते। द्रविडान्ध्रकर्णाटकादयोऽपि पैशाचजन्यामेव पञ्चद्राविडभाषासन्ततिं उपयुञ्जते। एवं पैशाचभाषापि सर्वदेशीभाषाणां उद्भवस्थानं आसीत् इति अस्याः भाषायाः इव बृहत्कथायाः आपि रामायण-भारतादिवत् सर्वत्र भारतीयसाहित्यं प्रति आकरत्वं सम्पन्नम्। यथोक्तं दण्डिना - **भूताभाषामयींप्राहुः अद्भुतार्थां बृहत्कथाम्।**

**महाराष्ट्राश्रयां भाषां प्रकृष्टां प्राकृतं विदुः।**
**तत्समस्तद्भवो देशी त्रिविधः प्राकृतक्रमः।** इति

तत्समः - समसंस्कृतः। यथा चक्रं मञ्चः मणिः इत्यादिः। तद्भवः- अपभ्रंशः। यथा राजा-राया, आर्यः-अज्ञो, यज्ञः-जन्नो इत्यादिः। देशी एव पैशाची। एवं भारतवर्षस्थानां सर्वासां देशीभाषाणां इमाः भाषाः एव मातापितृवत् मूलकारणम्। तदाह कन्नडव्याकरणाचार्यः नागवर्मा-"**संस्कृतं प्राकृतं अपभ्रंशं पैशाचिकमेम्ब मूरूवरे भाषेगळोळ् पुट्टुवद्रविडान्ध्र-कर्णाटकादि षट्पञ्चाशद्विषयविवर्तिभाषाजातिगळक्कुम्**" इति।

## (3) बृहत्कथायाः अनुवादाः

यथा संस्कृतभाषास्थानां रामायण भारतादीनां देशीभाषासु तत्तत्प्रदेशेषु अनुवादाः लोके भवन्ति स्म तथैव देशीमूलभूतायाः पैशाचभाषायाः अपि बृहत्कथादयः ग्रन्थाः संस्कृते अनूदिताः भवन्ति स्म। बृहत्कथायाः प्रायः

प्रथमं अनुवादः कर्णाटकदेशे गंगराजस्य दुर्विनीतस्य संस्कृतकृतिः इति शासनपट्टेभ्यो ज्ञायते यथा "देवभारतीनिबद्धवड्ढकहेण इति। अयं दुर्विनीतः भारवेः महाकवेः शिष्यः। भारविः अस्य आस्थानपण्डितः। एवं दुर्विनीतस्य मन्त्री बुधस्वामी बृहत्कथाश्लोकसंग्रहं निबद्धवान्। क्रिस्तोः परस्तात् पञ्चम-षष्ठशतकयोः अन्तरः एषां समयः। नेपाळपाठोपि कश्चन बृहत्कथायाः उपलभ्यते। कर्णाटात् काश्मीरं प्राप्तापि स्यात् इयं कथा जयापीडादीनां राज्ञां समये। द्राविडेपि पेरुंकतै उदयनचरितम् इति बृहत्कथा प्रथिता। अस्याः वृद्धकथा इत्यपि नामधेयम्। उत्तरापथे च इयं कथा स्वभाषयैव प्रचारे आसीत् इति कालिदासस्य मेघदूतवचनात् ज्ञायते। तत्रहि "उदयनकथाकोविदग्रामवृद्धान्" इति वचनम्। तत्र हि देशे **"आवन्त्याः पारियात्राः सह दशपुरजैः भूतभाषां भजन्ते"** इति पैशाचभाषामिश्रः पैशाचभाषासदृशश्च संस्कृतादिभाषाव्यवहारः आसीदिति राजशेखरवचनात् ज्ञायते। **"अपभ्रंशावदंशानि ते संस्कृतवचांस्यपि"** इति राजशेखरस्य काव्यमीमांसावचनम्। पैशाचभाषैव भूतभाषा। इयमिदानीं मनुष्यलोके मनुष्यैरेव ग्रन्थेषु नाटकेषु च व्यवह्रियमाणा अस्ति। भूत-प्रेत-पिशाचादयः ये देवयोनिविशेषाः मनुष्यैः न दृश्याः तेषां इयं भाषा इति न मन्तव्यम्। ते हि मनुष्येषु आविश्य वायुशरीरकाः तत्तन्मनुष्यजनेन अज्ञातामपि भाषां तन्मुखात् व्यवहरन्ति। अतः इयं न भूतप्रेतादीनां भाषा। पिशाचाख्येषु प्रदेशेषु तत्रत्यैरेव मनुष्यैः नानास्वभावैः व्यवहृता भाषा।

संस्कृतपण्डितः न केवलं संस्कृतभाषामात्रेण पण्डितो भवति स्म। किन्तु सः सर्वप्राकृतज्ञोऽपि भवेत् इति नियमः पूर्वकाले आसीत्। कर्णाटदेशे मैसूरु-महाराजाश्च संस्कृतविद्वत्परीक्षासु पाण्डित्यनिकषया प्राकृतव्याकरणं प्राकृतकाव्यानि च पाठ्यत्वेन व्यवस्थापितवन्तः। भास-कालिदास भवभूति भट्टनारायणप्रभृतीनां नाटकग्रन्थैरेव अद्यापि षट् प्राकृतभाषाः संस्कृतमध्ये जीवन्ति। तेषां नाटककथावस्तूनि च बृहत्कथातः एव परिगृहीतानि।

अनधीतबृहत्कथः पूर्वकाले संस्कृतकविषु कोऽपि नासीत् इति वक्तुं शक्यम्। क्रिञ्च अरेबियारात्रिकथाः, बोकाचियोकथाः चासरनकथाः षेक्स्पियर्-नाटकानि इत्येवमादयोऽपि बृहत्कथामूलादेव कथावस्तूनि स्वीकृत्य रचितानीति ज्ञायते इति विमर्शकाः वदन्ति।

क्रिस्तात्परं एकादशशतके काश्मीरे क्षेमेन्द्रो महाकविः बृहत्कथामञ्जरीति प्रायः सप्तसहस्रश्लोकपरिमितं संस्कृतग्रन्थं रचितवान्। काश्मीराजमहिषी एव कृतेः प्रेरिका। एवं तथैव सोमदेवोऽपि महाकविः तस्याः आज्ञया "कथासरित्सागरं" नाम बृहत्कथासंग्रहं क्षेमेन्द्रादपि विस्तरेण कृतवान्। द्वादशसहस्रश्लोकाधिकः कथासरित्सागरः। इदानीं मूलबृहत्कथा पैशाचभाषारूपेण न लभ्यन्ते। शालिवाहनस्य काले गुणाढ्येन कविना विन्ध्यारण्ये कस्माच्चित् पिशाचात् श्रुत्वा लिखिता सप्तलक्षश्लोकाक्षर-संख्यात्मिका बृहत्कथा आन्ध्रभृत्येन महाराजेन शकप्रवर्तकेन शालिवाहनेन लोके प्रवर्तितासीत्। दुर्विनीतकृतसंस्कृतानुवादोऽपि न लभ्यते। बुधस्वामिनः ग्रन्थोपि पूर्णतया न लभ्यते। बृहत्कथामञ्जरी कथासरित्सागरः द्वावेव इदानीं बृहत्कथायाः प्रतिविधिग्रन्थौ।

1839 क्रिस्तु वर्षे ब्राक्हौस् नामा जर्मन्पण्डितः कथासरित्सागरं प्रकाशितवान्। ततः कथासरित्सागरस्य आंग्लभाषायां अनुवादं शताधिकसंवत्सरेभ्यः पूर्वं चार्ल्स् हेन्रिटानि नामकः आंग्लपण्डितः वङ्गदेशे 1880 वर्षे कृतवान्। अे आर् श्री कृष्णशास्त्रिमहोदयः पञ्चशद्वर्षेभ्यः पूर्वं 'कथामृतम्' इति नाम्ना कन्नडभाषायां अनुवादं कृतवान्। एवं भाषान्तरेष्वपि अनुवादाः स्युः।

## (4) बृहत्कथायाः शरीरम्

बृहत्कथा तु कथोपकथानुकथाभिः एकामहारज्जुवत् भूमंडलाक्रमणशीला दिव्यलोकानुभवादिसंबद्धा च विराजते। नानाविधाः सामाजिकाः

विषयाः नय-विनयादीनां शिक्षणे उपयोगिन्यश्च कथाः तत्र लभ्यन्ते। मनोहराश्चकाश्चित् अमनोहराश्च। अद्भुतरसः एव अधिकः। इतिहासस्तु अल्पः। अस्याः अयं संग्रहः -

**आदौ शैवगणावतारकथनं, श्रीवत्सराजोर्जनं,**
**तत्सूनोर्नरवाहनस्य हरणं, नानाकथाश्रावणम्।**
**तत्रैवं दशसत्कुमारचरितं, श्रीविक्रमादित्यकं,**
**नानानीतिदपञ्चतंत्रकथनं, चैवं बृहत्का कथा ॥** इति

## (5) कीर्तिसेनाकथारचना

संस्कृते श्लोकरूपेणैव उपलभ्यमाना बृहत्कथा तु बालानां पठनपाठनादिषु नातीव रुचिरा। अतः तत्रत्याः कथाः सरलगद्यरूपेण मूलबृहत्कथावत् जनपदयोग्याः कृताः पण्डितकविना नागमङ्गलनरसिम्हाचार्येण। कथासरित्सागरात् उद्धृत्य विरचिता एका कीर्तिसेना इत्याख्यायिका कथानुकथनरीत्या रचिता संस्कृतबालानां उपयोगिनी। अस्यां ज्ञातव्याः व्यक्तिगुणाः मम बृहत्कथामञ्जरीमधुदर्शनात् उद्धृत्य लिख्यते।

**धी-क्षमा-धैर्य-चातुर्य-कीर्तिसेनाकथा शुभा।**

**श्वश्रूभिः क्लेश्यमानानां स्नुषाणां दैवसाह्यजम्।**
**सुखमित्येव सारार्थः पौरुषं तूपसर्जनम् ॥** इति।

एवं नूतना गुणानुसन्धानप्रधाना परिपाटी नरसिंहेन कविना गद्ये सरलतया सरसतया सभ्यतया च प्रकाशितेति विशेषः। अस्याः रचने कारणं च नरसिम्हाचार्यस्य भागिनेयी सौम्यनायिकानाम्नी बाला। इयमिदानीं संस्कृतादिषु पण्डिता नागमङ्गले अस्ति। तत्र नगरात् बहिः नातिदूरे उपवने विद्यमानं 'चक्रकोळं' इति प्रसिद्धं चक्राकारपुष्करिणीस्थानम्। अत्र रामानुजमण्टपः शिलास्तम्भफलकमयः, एकं मृत्कर्परकबळिकागृहं च विद्यते। भारतस्वातंत्र्यसंग्रामकाले अत्र

गान्धीभक्ताः समागत्य हिन्दवः मुस्लिमादयः बहवः देशस्य स्वातंत्र्यलाभं सभ्यतायाः रक्षणं इत्यादिविषयेषु विचारविनिमयं कुर्वन्ति स्म। बाला सौम्या तु तेषां अन्नपानादिषु पत्रप्रेषणादिषु च साह्यं करोति स्म। सा मातुलं कविं तदा तदा कथाकथनाय बलात्कुरुते स्म। तदा कविः यदि त्वं संस्कृते कथां शृणोषि तर्हि वच्मि इति। एवं कथितलिखितासु बालकथासु इयमेका 'कीर्तिसेना' कवेः कीर्तिवत् अवशिष्टा।

कीर्तिसेनागद्यं तु इदानीं प्रकाश्यमानं विद्यते। मैसूरुमहाराजसंस्कृत-महाविद्याशालायां सरस्वतीप्रासादाख्यायां क्रिश 1930 तः 1945 पर्यन्तं साहित्यालंकारतर्कविद्यार्थिना कविना शालापत्रिकायां 1948 तमे वर्षे प्रकाशिता च। अस्याः अनुबन्धेषु बृहत्कथामञ्जरी-भागः कथासरित्सागर-भागः कथामृतभागश्च संयोजिताः। एतेषां संवाददर्शनेन इदं ज्ञायते, यत् मूलग्रन्थाकरेषु कथाकथनस्वारस्यं वाक्योपबृम्हणानि च न्यूनानि। कविः मूलकथां यथोचितरीत्या उपबृंहयन्, बृहत्कथायाः सामाजिकाधुनिक-जीवनसम्बद्धतां नयविनयादिगुणप्रगुणतां च आविर्भावयति।

एवं संस्कृतगद्यकथासाहित्ये आधुनिकानां कवीनां मध्ये अयमपि कविः एकं समीचीनं स्थानं प्राप्नोति। गद्यस्य सरलतां, बाणादि-गद्यकाव्येभ्योऽपि विलक्षणतां, असभ्यपरिहारेण सरसनीतिमत्तां च समाजे स्त्रीशिक्षणं स्त्रीस्वातन्त्र्यं धैर्यादिगुणगणं च स्त्रीणां भारतराष्ट्रे आवश्यकत्वेन प्रतिपादनं च पश्यन्तः सहृदयाः संस्कृतशिक्षणे पठ्यग्रन्थतया इमं स्वीकर्तुमर्हन्ति। उक्तं च कविना -

**बालोपयोगिगद्यानां वैरल्यमनुचिन्तयन्।**
**नृसिम्होऽरचयद् गद्यं कीर्तिसेनाभिधं नवम्।** इति

## (6) कविपरिचयः

अयं नृसिंहार्यः लौहितगोत्रः आश्वलायनसूत्रः ऋक्शाखाध्यायी श्रीनिवासाचार्यस्य द्वितीयः पुत्रः। माता सौम्यनायकीति। भ्रातरः चत्वारोऽपि संस्कृत-कन्नड-तमिळ्-उर्दूप्रभृति-भाषासु पण्डिताः सङ्गीतज्ञाः चित्रकलाविदः नागरिककलाकुशलाश्च। सालग्रामशिलावत् वर्णेन स्निग्धतया च सुन्दराङ्गाः इमे भारतस्वातंत्र्यसंग्रामे शूराः सैनिकाः सैनिकसम्पादकाश्च आसन्। अयमपि तथैव। इमे मम पितामहस्य मातुः स्वसृकुलाः। कर्णाटकदेशे इदानीन्तने मण्डयमण्डले प्राचीनं नगरं मयमतानुसारेण निर्मितं जगद्देवरायढणायकादिभिः परिपालितं दुर्ग-सालाग्रहारवापीकूपतटाक-सर्वदेवमन्दिर-नागरिकजनसम्पूर्णरत्नापणरुचिरं च आसीत्। इदानीं तत्रत्याः अष्टादशजातीयाः प्राचीनसंस्कारसम्पन्नाः पण्डिताः कलाविदः कलाकाराश्च देशान्तेरषु द्वीपान्तरेषु च वसन्ति। क्रिशवर्षे 1910 तमे जातः नृसिह्मार्यः कञ्चित्कालं नागमङ्गले वाणीभूषण संस्कृतमहापाठशालायां विद्याभ्यासं कृतवान्। ततः मैसूरु-महाराजसंस्कृतमहाविद्याशालायां तर्कशास्त्रे अलंकारशास्त्रे च विद्वत्परीक्षां उत्तीर्य महाराजेन राङ्कवस्वर्णपदक-धनादिना सम्मानितः विद्वानितिपरिगणितश्च। राजभक्तोऽपि गान्धिमहात्मनोऽनुयायी। खादिवस्त्रधारी कांग्रेस्संस्थासदस्यः शिवपुरध्वजसत्याग्रहेऽपि स्वबन्धुसमूहेन सह भागं ऊढवान्। अस्य सहाध्यायिनस्तु नागमङ्गलीयाः किडाम्बिश्रीनिवासाचार्यः तस्य भ्राता वेंकटार्यः सामिनामा अन्यश्च तद्भ्राता, एव 'आत्रेयः' इति विनोबापरिवारे प्रसिद्धः नरसिम्हाचार्यः हरियाणा-प्रदेशंगतः सर्वोदयकार्यकर्ता इति चत्वारः संस्कृतहिन्दीकन्नडवैद्यकागमादिषु पण्डिताः, कविकोकिलः भीमनकोणे भास्करभट्टः गोरुरुनरसिम्हाचार्यः तर्कपण्डितः सर्वोदयकार्यकर्ता च इत्येतौ च मया ज्ञातौ। इमौ द्वौ नृसिम्हाचार्यस्य कवेर्विषये बहून् वृत्तान्तान् मां श्रावितवन्तौ। हिन्दी उर्दू-कन्नडतमिळु-आग्ल भाषास्वपि उन्नतस्तरे अधीतवान् अयं गान्धिमहात्मना "हिन्दी विशारद" पदे मद्रास्-नगरे

सम्मानितश्च। ततः तुमकूरु-मण्डले कन्नडसंस्कृताध्यापकत्वेन कर्म कुर्वन् आसीत्। सिद्धगङ्गासंस्कृतपाठशालायां तन्मठस्वामिनां अपि शिक्षकत्वेन कञ्चित् कालमासीत्। कञ्चित्कालं तिरुपतिवेङ्कटेश्वरस्य भगवतः अन्तरङ्गाभिषेकादिसेवां कुर्वन् आसीत्। अयं क्रिश 1959 तमे वर्षे परलोकं गतः।

एतेन रचिताः उपलभ्यमानाः ग्रन्थाः एते

1) कीर्तिसेना - संस्कृतगद्यकथा
2) कनकावती - ऐतिहासिकं संस्कृतखण्डकाव्यम्।
3) दयाशतकस्तोत्रस्य कन्नडानुवादः
4) श्रीवेंकटेश्वरसुप्रभातस्तोत्रादीनां कन्नडानुवादः
5) प्रपन्नामृताख्यस्य चारित्रिकग्रन्थस्य कन्नडानुवादः
6) वार्तामालाख्यद्राविडग्रन्थस्य कन्नडानुवादः

अनुपलब्धाः सन्तिबहवः हिन्दीभाषाप्रभृतिषु -

## (7) कीर्तिसेनाप्रकाशने कृतज्ञतानिवेदनम्

अस्याः गद्यकथायाः प्रकाशने ग्रन्थकर्तुः पुत्रौ पुत्री स्नुषे भ्रातृपुत्रः भगिन्याः पुत्री संस्कृत-कन्नड-उर्दू-पण्डिता सौम्यनायकी च वाग्-धनादिसाह्यं कृतवन्तः। सम्पादनकार्ये मुद्रणशोधने च विद्वान् **उमाकान्तभट्टः** उभयन्यायविद्वान् छन्दस्वत्याः पद्यपत्रिकायाः सम्पादकः अस्मन्मित्रं साह्यं कृतवान्। श्रीचन्द्रशेखरः चारित्रमुद्रणालयाधिपतिः सम्यक् मुद्रणेन साह्यं कृतवान्। सर्वेभ्यः एतेभ्यः उपकारस्मरणात्मिकां मम सम्भवनां ज्ञापयन्ती प्रणामाञ्जलिः।

इति सहृदयवशंवदः
**अरैयर् श्रीरामशर्मा** - मेलुकोटे
14-4-2001

॥ श्रीः ॥

# कीर्तिसेना

**नमश्चित्रचरित्राय नित्यं मङ्गलरूपिणे।**
**निष्कारणकृपापूररक्षिताखिलजन्तवे ॥1॥**
**नत्वा गुरुवरान् सर्वान् नुत्वा पूज्यान् महाकवीन्।**
**गद्यग्रन्थमिमं कुर्वे कीर्तिसेनाभिधं नवम् ॥2॥**

भारते देशे श्रीनगरमतितरां प्रसिद्धं नगरम्। सकलसौभाग्यसमृद्धतया सार्थकं नामधेयमस्य नगरस्य। आसीत्तत्र सकलजनमनोरञ्जनो नरपालः कश्चन भुवनमोहनो नाम। तत्रत्यास्सर्वेऽपि जना निर्मत्सराः, नीरोगाः, विद्यापक्षपातिनः, परोपकारनिरताः, कल्याणकामाश्च। किं बहुना ? **'यथा राजा तथा प्रजाः'** - इतीयं गाथा तत्रैव नगरे तेष्वेव जनेषु चरितार्था बभूव।

तस्मिन्नेव नगरे धनपालो नाम कश्चिदन्वर्थनामा वणिगास्त। तस्य कान्ता वपुषा नाम्ना च रूपवत्यासीत्। सा च साध्वी देवद्विजादिषु भक्तियुता क्षमादिगुणगणभरिता च। धनपालश्च तदनुगुणः कान्तः। सुगुणभरितयोरनयोः पुण्यफलमिव कतिपयेष्वेव दिवसेषु जातमेकं कन्यारत्नं, यां किल कीर्तिसेनेति पितरावाजुह्वतुः। या च सुकविविरचितप्रबन्धावलिरिव सुगुणालङ्कारा सरसा च कीर्तिभाग्बभूव।

बाला सा कदाचिदव्यक्तमधुरैरकारणजनितैः मृदुमन्दहासैरा-नन्दयामास पितरौ। कदाचिदर्धलपितैरपरिस्फुटार्थपरिकलितैर्नूतन-वचनविशेषैस्तोषयामास। अल्पैरेव दिवसैः प्रस्खलितपदं वचनमिव गमनमपि वर्धयामास। अस्या बाललीलां विलोक्य प्रातिवेशिका अपि नितरां ननन्दुः। किं पुनर्जनकौ ? एवमस्या मुग्धविलसित-मुल्लसितमासीद्दिने दिने।

क्रमेण शैशवमतिक्रममाणा सा बालचापलान्यपि तत्याज। नीतिभरितसुभाषितादीनां, सावित्रीचरितादिसुचरितसूक्तीनां चावलोकनेन संप्राप्तसुगुणा सुतरां विरेजे। केवलबाल्य एव बाललीलाभ्यो न स्पृहयति

स्म। स्वाधीनपरिपूर्णवागपि नो बहु बभाषे। यावत्प्रसक्तं तावदेव व्याजहार। परपुरुषदर्शने परिजह्रे स्वकीयां दृष्टिम्। विशेषतो युवकजनस्य। एवमस्या वयसि तरुणिमानमाक्रामति सति स्वस्या नामधेयमिव सौशील्यादिमा गुणगणा अपि दूरदूरतरं प्रसेरुः।

यथा यथा व्यजृम्भताऽस्या यौवनं तथा तथा पदमाक्रामि विवाहचिन्तया मनसि जनकयोः। धनवते वरायैव देया मम तनुजेति कुटुम्बिनी प्राह। भर्ता तु - 'किमनया केवलया धनपिशाचिकया। रूपमात्रेणापि किं प्रयोजनम्? सुजनता तथा सुशीलतैव प्रशस्ता। अहमपि तादृशमेव विचिनोमि' इति। सा पुनः - 'नाथ, यदि धनं, सर्वमपि संपद्यत एव। धनवानेव गुणी। स एव शास्त्रवेत्ता। नीतिनिपुणोऽपि स एव। धनवन्तमेवाश्रयति सर्वोऽपि लोकः। सफलगुणपरिपूर्णमपि निर्धनं तृणाय मन्यते लोकः। अतो धनवानेव वरो विलोकनीय इति मे मनीषा।' - इत्यब्रवीत्। पतिस्तु तच्छ्रुत्वा समन्दहासं पुनरेवं जगाद - 'प्रिये, सत्यम्। युक्तमभ्यधाः। अयमेवेदानीन्तनो लोकव्यवहारः। अथापि किञ्चिदिव विचारणीयमस्ति। ममापि धनहीनाय देया कन्येति नास्ति मतिः। लोके धनप्रधानास्सन्ति बहवो वराः। धनेन सह श्रुतशीलादिकमपि यदि विद्येत तर्हि **'रत्नं समागच्छतु काञ्चनेन'**। कुटुम्बिनी च सामोदमाह - 'इदं तावत् का निवारयेत् ? तदिदं क्षुधितस्य केवलमन्नार्थिनः पायसावाप्तिश्च नाम। भवतु। तथा क्रियतां यथाऽस्मत्तनुजा सुखिनी स्यात्' - इति। पतिस्तु तदाकर्ण्य किञ्चिद्विरम्य - 'इदमास्तां तावत्। अस्मदानीयमानमेव वरमनुमन्येत वा तव पुत्री? तत्र तस्या अभिप्रायविशेषः परिशीलनीयः किल।' - इति तामपृच्छत्। सा तु साकूतमेवमब्रवीत् - 'यद्यपि भवन्तः धनिनं श्रुतपारदृश्वानं सुरूपमेव वरमानयेरन्। न हि कदाचिदपि कोऽपि पिता पुत्र्या असुखं विलोकयितुमीष्टे। अथापि लोके सौन्दर्यनिर्णयो बहुप्रकारो हि। यदेकस्मै रोचते न तदेवान्यस्मै। असह्यमेव रोचते कस्मैचित्। सुन्दरमपि निन्दति मन्दधीः अपरः। कथमस्य निर्णयः? **'यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम्'** - इति किल कविसूक्तिः। अथवा किं

बहुनोक्तेन ? संस्मृत्य युष्मद्विवाहकालं, कालमिमं च विचिन्त्य, यथा लोको न निन्देत् यथा च समीहितसिद्धिर्भवेत्तथा कुरुत' - इति। धनपालस्तु - 'साधु साधु। सम्यगभिहितं भवत्या। युक्तमपि चारुतरं भणितम्। यदि ममाप्येतादृशी वचनचातुरी स्यात् त्रिभुवनमपि परिवर्तयेयम्' - इति कथयन्नेव प्रदेशात्तस्मान्निरगात्।

आसीन्नागनगरे देवसेनो नाम वणिक्तरुणः। स च प्रायः पञ्चविंशतिवर्षदेशीयः। न कुरूपी, दर्शनीयः। नातिधनी, परं तु जीवनविषये न काचिच्चिन्ता। अतिसरलः। नर्मप्रियोऽपि तथ्यवादी। मृदुरपि सत्यप्रियतया कठिनतरः। नीतिमार्गानुसारी। अधिगतसामाजिकव्यवहारः राजकीयेष्वपि व्यवहारेषु संचचार। किं बहुना? राजापि शश्वत्तमानाय्य मन्त्रयामास। कदाचिदमात्यपदमलङ्कर्तुमपि तं प्रेरयामास नरपतिः। स तु निःस्पृहो निन्दास्पदमेव तन्मेने। एवं स निगूढहितकामस्सर्वलोकानां भस्मपिहित इव पावको नितरां विरेजे। अथापि तस्य कीर्तिर्दिगन्तव्यापिनी बभूव। पिहितायामपि कस्तूरिकायां न हि तत्सौरभमपि पिहितं भवति। क्रमेण तरुणोऽयं धनपालश्रवणपथेऽपि गोचरीबभूव।

धनपालो व्यापारव्याजेन नागनगरमगात्। प्रसङ्गतो देवसेनमपि ददर्श। दर्शनसमकालमेवाऽस्य चक्षुः क्षणमिव कर्तव्यपराङ्मुखं तस्मिन् यूनि संचक्राम। अनुपदमेव तेन समालपितः भग्नयोग इव योगी बभूव। तथैव तेन संप्रार्थितस्सन्नातिथ्याय तं दिवसमशेषं तत्रैव स्थातुं निश्चिकाय।

परेद्यवि कृतभोजनौ धनपालदेवसेनौ गृहाङ्गणे समुपविष्टौ। धनपालः स्वनगरगमनविषयं प्रकटयन् तैस्तैस्संलापैः कञ्चित्कालं निनाय। प्रसक्तानुप्रसक्त्या श्रीनगरस्य सौन्दर्यं, तत्रत्यस्य राज्ञो महानुभावतां, जनानामुदारतां च वर्णयित्वा तादृशनगरावलोकनाय देवसेनं सादरमामन्त्रयमास। सोऽपि सानन्दमङ्गीचकार। तदनु परमविस्मितो धनपालः - 'अहो देवस्य प्रसन्नता, विनैव यत्नं सेत्स्यति मम कार्यम्। यदेतादृशं सौजन्यमदृष्टपूर्वमश्रुतपूर्वं च' इति मनसि चिन्तयन् भूयोऽपि तमामन्त्र्य स्वनगरं प्रतस्थे।

तन्त्रीवार्तासमागम इव समाजगामात्यल्पकाल एव श्रीनगरं देवसेनः। समभिजगाम तं दूरादेव धनपालः। क्षणादेव गृहमागच्छतामुभावपि।

द्वित्राणि दिनानि व्यतीयुः। देवसेनस्तत्रैवावतस्थे। स कदाचिन्माननीयान् प्रदेशान् द्रष्टुं जगाम। कदाचिल्ललितकलाप्रसङ्गेषु, कदाचन पण्डितप्रकाण्डप्रवर्तितेषु कथालापविनोदेषु च कालं निनाय। देवसेनस्य स्वभाव एवैतादृशः। तस्य स्वभावे न काचिन्न्यूनता नाप्यधिकता। नगरे पुनः जनानामज्ञाततत्त्वगन्धानामपि विविधा आलापाः प्रसेरुः। 'अयमेव जामाता भवेत्' - इति केचन। 'नायं जामाता भवितुमर्हति। अनाढ्य इति श्रूयते' - इत्यन्ये। 'धनं तावदास्ताम्। रूपं किल प्रधानम्, तदेव न पश्यामः' - इत्यपरे च स्वयमेव पूर्वपक्षसिद्धान्तादिकं चक्रुः। इतरे तु मत्सरग्रस्ताः - 'असाधारणोऽयं धनपालः। कञ्चन मीनं स्वपेटिकायां निक्षेप्तुमिच्छति' इति जजल्पुः। राजपुरुषाः केचन - 'आगतोऽयमपरो वराकः। प्रायो राजानमाश्रयेत्। अस्माभिरिदानी-मप्रमत्तैर्भवितव्यम्।' - इति परस्परं कुटिलतन्त्रं विरचयामासुः। तेष्वेव कतिपये - 'अये, कोऽयं महानुभावः? अतिगम्भीरोऽयं पुमान्। सततं मन्दस्मितेन मधुरवचनेन च मनोहरः। यद्ययमप्यस्मत्सहचरो भवेत्तन्नियतं नरपतेस्सौभाग्यमेव' - इति प्रशशंसुः। एवमेव बहवो ननन्दुर्निनिन्दुश्च।

कदाचन केचन कन्यापितरः प्रशंसनव्याजेन पर्यवारयन्नमुं तरुणम्। आसर्गं निसर्गसिद्धोऽयं विषयः, यदनूढतरुणदर्शने कन्यापितरस्त-मनुसरन्तीति। स च विज्ञाततदभिप्रायः - 'नाहमिदानीमुद्वहामि, क्षन्तुमर्हन्ति भवन्तः' - इत्युक्त्वा तान् विसर्जयामास। अनुपदमेव पञ्जरस्थ इव विहङ्गमः स्वेच्छया स्वनगरं गन्तुमियेष।

नागनगरे देवसेनः स्वभवने किमपि पुस्तकं गृहीत्वा पठितुमुद्युक्तो बभूव। अनुपदमेव द्वारदेशे कस्यापि कण्ठध्वनिरश्रूयत। विचार्यमाणे वार्ताहर आसीत्। स च लेखमेकं दत्त्वा यथेचितं प्रणम्य निर्जगाम। अयमप्यभ्यन्तरं प्रविश्य पत्रमुद्घाट्य ददर्श। तत्रैवं लिखितमासीत् -

श्रीनगरम् श्रीमुख सं पौषशुद्ध 5

'स्वस्ति भवते निष्कारणबन्धवे देवसेनाय। कुशलमुभयत्र सम्प्रति।'

'मित्रवर्य, इतो गतेन भवता मनोऽप्यस्माकमपहृतम्। अथापि मनोरथाः पुनरधिकतरं वर्तन्त इति चित्रमेतत्। अस्तु तावदिदम्। भवस्सौजन्य - सौलभ्यादिकमेव मामेवं लिखितुमुत्साहयति। यदि मया क्रियमाणमपराधास्पदं क्षमतां भवान्।'

'जनात्येव भवानपि यन्मम कन्यकैका विवाहयोग्या वर्तत इति। भवन्तं संपश्यतो मे चित्तं वरार्थमन्यत्र - न जाने कुत इति - न लगत्येव। निवेदिता मया वस्तुस्थितिः। प्राज्ञो भवान्। कर्तव्यविषयस्तु भवदधीनः। सम्यगालोच्य सम्मतिमसंमतिं वा प्रकटयतु। असंमतमित्यनेनैव कारणेन सौहृदस्यापि भङ्गो मा भूत्। तावता स्नेहस्य का हानिः? संमते तु ततो जन्मपत्रिकामपि प्रेषयेयम्। भवानपि प्रहिणोतु। यौतकविषयस्तु मुखत एवावगन्तव्य इति नेदानीं प्रस्तुतः। यथा भवतु, यथावकाशं यथाशीघ्रं प्रेषयतु भवान् वार्तापत्रिकाम्।

इति भवदीयवार्ताकाङ्क्षी
धनपालः'

भूयोऽपि पत्रिकां पठित्वा मातुस्समीपमगमत्। बहोः कालात्पूर्वमेवाऽस्य पिता उपरत आसीत्। अतश्च मातैव हितकाङ्क्षिणी बभूव। सा च पुत्रवत्सला तमेव सुतं सर्वस्वं मेने। सोऽपि तामेव परदैवतं विजज्ञे। मातुरग्रे पुनरपि पत्रिकां पठित्वा विदितार्थां तामकरोत्। सा तु अनुपदमेव पुत्रवधूमुखावलोकनाय स्पृहयन्ती, अनितरसाधारणं श्वश्रूपदं कामयमाना च सानन्दमनुमोदमाना सुतमब्रवीत् - 'पुत्रक ! "**शुभस्य शीघ्रम्**" इति लोकरूढिः। त्वमपि प्राप्तवया एव। स्वयमेवागतां लक्ष्मीं को वा जहाति। क्षिप्रमेव पत्रं लिख; यथा मङ्गलमिदं सफलं भवेत्' इति। एवमुक्त्वा माता गृहकार्यायोदतिष्ठत्। सुतश्च स्वापवरकं प्राप। प्राप्य च - 'किमिदानीं करणीयम्' इति क्षणमिव चिन्तयामास। अनुपदमेव पत्रिकामेकां लिलेख। अक्षरस्खालित्यादिपरिशोधनाय लिखितां पत्रिकां पपाठ।

"नागनगरम्,
श्रीमुख सं पौषशुद्ध 10"

"माननीयानां धनपालमहोदयानां सविधे - देवसेनस्येमाः प्रणतिपुरस्सर्यो विज्ञप्तयः।

भवद्भिः प्रेषिता पत्रिका प्राप्ता। अवगताश्च विषयाः। यदि वरत्वेन युष्माभिरभिलषितोऽयं जनः, यदि चानेन प्राणिना प्रयोजनमपि यत्किञ्चिद्भवेदिति मनीषा, तर्हि सिद्धोऽस्मि युष्मदभिप्रायनिर्वहणे।

यौतकविषये ममाऽयमाभिप्रायः। न खलु किञ्चिदपि यतितव्यं वस्त्वन्तरसम्पादनाय। कन्यां किलोद्वहेयमहम्, न तु वस्त्वन्तराणि। कारणान्तरेण संगृहीतान्यपि नाहमङ्गीकुर्याम्। औद्धत्यमिदं क्षन्तुमर्हन्ति भवन्त इति संप्रार्थ्य विरमामि।

इति विज्ञप्तयः, देवसेनः

इत्येवं पठित्वा प्रेषणीया पत्रिकेति निश्चित्य प्रदेशात्तस्मान्निरगात्।

कीर्तिसेनादेवसेनयोर्विवाहः यथोचितं निरवर्ति। कीर्तिसेना नागनगरे अवर्तत। इदानीं गृहे देवसेनः, तस्य कुटुम्बिनी, माता च। नूतनदम्पती तौ तु परस्परं प्रियतरावास्ताम्। मातापि वधूं पुरस्कृत्य स्वभागधेयं सर्वत्र मुहुर्मुहुः शश्लाघे। प्रातिवेशिनो जनाः, अन्ये च सरला अनुकूलाश्चासन्। एवं सुखेन समतीतः कश्चन कालः।

यथा देवसेनो मातृभक्तस्तथा कीर्तिसेनापि गुरुजनसेवानिरता पतिहितसहिता च। सर्वदा छायेव तं पतिमनुससार। न केवलमनुसरणे, विषमप्रसङ्गेषु समयोचितानामभिप्रायविशेषाणामावेदनेऽपि सा समर्था बभूव। एवं सुकलत्रश्रिया सौमातृकतया च देवसेनः तात्कालिकं जीवनपथं सुगमं मनोरमं च मेने। प्रथममेव विश्रुतकीर्तिरपि देवसेनः तयाऽनुकूलया 'कीर्त्या' नितरां कीर्तिमानभवत्। नगरे तस्मिन्नैकोऽपि तादृशो जनो यः कीर्तिसेनां न श्लाघते। गृहलक्ष्मीरिति तां देवसेनो जज्ञावित्येतन्न चित्रम्, यतस्तां साक्षाल्लोकमातेति याचका अपि मेनिरे। एवं तयोर्नूतनमपि तद्दाम्पत्यमितरेषामपि मार्गदर्शकमासीत्।

लोके निरन्तरं सौख्यं कस्यापि मा भूदित्येव विधिनियम इति भाति। पतिविरहिता सा श्वश्रूः स्वल्पेष्वेव दिवसेषु पुत्रानुकूलां वधूं दृष्ट्वा सहसा चण्डी बभूव। प्रथमं या मातेव रक्षति स्म सैवेदानीं राक्षसीबभूव। रहस्येव - यथा सुतो न जानीयात्तथा तां कदर्थयामास। तिष्ठन्त्यामपि तस्यामपराधः। उपविशन्त्यामपि। वदन्त्यामप्यागः, मौनेऽपि तदेव। सहसा समुत्पन्नमिदं वैपरीत्यं विलोक्य कीर्तिः कारणमजानाना मनस्येवमचिन्तयत् - 'अहो ! को मे प्रमादः? सावधानेनैव चेतसा कर्तव्येषु प्रवर्तेऽहम्। न खलु बहुधा चिन्तयन्त्यपि वैपरीत्यस्यास्य कारणं जानामि। यदि सत्यमेव मयि दोषो न स्यात्तर्हि कुतो वा मह्यमम्बा कुप्येत्। करुणार्द्रहृदया किल श्वश्रूः। न कदाचिदपि दृष्टमस्याः कोपकलुषितं वदनम्। अथवा येन केनापि प्रकोपिता भवेत्। इदमपि नो चारु। नास्ति मे कोऽपि विद्रोहकारी जनः। न शक्नोमि नाथाय वक्तुमपि। यदि कथञ्चिद्वदेयं तस्मा अपि कुप्येन्माता। स्थितिरेवान्यादृशी भवेत्। मन्दभाग्याया मम कृते पतिरपि दुःखभाग्भवेत्। अतः प्रियायापि न निवेदयामि। भवतु। **भवितव्यं सर्वमपि श्रेयस एव कल्पेत।** जागर्ति किल भगवान् पुरुषोत्तमः' - इत्यादिना बहुना प्रकारेण चिन्तयित्वा समाहितचित्ता बभूव।

व्यतीयुः केचन दिवसाः। साध्वीमपि वधूं प्रति श्वश्रूः दिने दिने निष्कारणमेव ज्वलन्त्यासीत्। नियतिरपि तस्या एवानुकूला परिणता। पुत्रः कार्यान्तरेण देशान्तरं गन्तुमुद्युक्तो बभूव। समाकर्ण्य, वृत्तान्तममुं सममेव चिन्ताप्रमोदाभ्यामकारि पदं वधूजनन्योर्मनसि। **'अहो ! दैवी विचित्रा गतिः।'**

कीर्तिसेनाया मनःप्रवृत्तिरिवाऽस्तमुपगतो भगवान् दिनमणिः। अस्या मनःकुहर इव सर्वत्र संछादिता गाढान्धकाराः। आशाङ्कुरा इव दीपाङ्कुरास्समुद्दीपिताः। कृतभोजनास्सर्वे शयनाभिमुखा बभूवुः।

कीर्तिसेनादेवसेनावपि शयनमन्दिर एवास्ताम्। अपि तु मौनव्रतधारिणौ। प्रवासविषयचिन्तया नूतनविरहचिन्तया च देवसेनः,

तयैव चिन्तया ततोऽप्यधिकतरं श्वश्रूविषयचिन्तया च कीर्तिरपि व्याकुलाऽऽसीत्। प्रायः लोके स्वेष्टजनविरहः सुदुस्सहो भवति, किं पुनरस्यामवस्थायाम्। कीर्तिसेना श्वश्रूविषयप्रस्तावे डोलायमाना बभूव। कष्टा खलु कुटिलश्वश्रूपरतन्त्रवधूस्थितिः । एवं परस्परं मौनरूपप्रश्नोत्तरेणैव समतीतः कश्चन कालः। ततः पतिरेव तां सान्त्वयितुमुपचक्रमे। अपि तु सा निरुत्तरा रोदितुमारेभे। स्वदुःखं कथयितुमपि न शशाक। नापि च तूष्णीं स्थातुम्। ततश्च यथाकथञ्चिद्विदितार्थमकरोत्पतिम्। श्रुत्वा सोऽपि किंकर्तव्यता-मूढश्चिन्तयामास। चिन्तयैव निशा प्रभाता।

प्रायः प्रातःकालिकदशघण्टासमयः। कृतभोजनो देवसेनः कमपि प्रतीक्षमाण इवावर्तत। क्षणादेव समाजगाम चषकपाणिर्मन्दंमन्दं कीर्तिसेना। तस्य पुरतो निक्षिप्य चषकं पार्श्वे तूष्णीमवतस्थे। देवसेनस्तु तामुपवेश्य - 'अयि कातरे ! प्रकृतिस्था भव। वृथा वैक्लब्येन किं प्रयोजनम्? अहमपि क्षिप्रमेव कार्यं परिसमाप्य प्रत्यागच्छामि' - इत्यवादीत्। सा तु साध्वी - 'नाथ, शृणोमि दूरे गन्तव्यो देशः। कार्यमपि गुरुतरम्। अहं च परवती - - - - ' इति वक्तुमुपचक्रमे। स्तम्भिततया कण्ठस्य अधिकं वक्तुं न शशाक। एतस्मिन्नन्तरे 'वत्स, एहि तावत्' इति माता शब्दापयामास। श्रुत्वा द्वावपि ससंभ्रमं निश्चक्रमतुः। तस्मिन्नेव समये प्रयाणसमयसूचको भृत्यश्च समाजगाम। देवसेनस्तु - 'पश्य इयं पेटिका, इयं च शय्या सुसज्जितैव। गच्छ, शकटमानय' - इति सेवकमुक्त्वा प्राहिणोत्। गते तु किङ्करे माता प्राह - 'वत्स, दूरतरं व्रजसि। शरीरविषये पुनर्जागरूको भव। अनुपदमेव वार्तापत्रिकां लिख' इति। पुत्रस्तु 'मम शरीरं तावदास्ताम्। - - - -' इत्यर्धवचस्येव विरराम। तावतैव माता ज्वलन्तीव क्रुधा 'आं ज्ञातम्। कथय मा वधूमुपेक्षस्वेति' इति चुकोप। सुतः 'अम्ब ! वधूरियं तव हस्तगता। नवोढा। कुलीना च - - - -'। माता तावतैवाक्षिप्य - 'नापि त्रीणि दिनान्यासन्नस्या ऊढाया गृहमागतायाः। तावतैवैतावतीं भूमिमागतः प्रभावः। भवतु पश्यामः' इति वधूमाकार्य - 'अयि दुर्मुखि, कथय किंकृतं मया।

येनेदानीं वत्सोऽपि मां प्रतिवदति' इति पप्रच्छ। किं कुर्यात्सा बाला। प्रथममेव भीता। इदानीं पुनरधिकतरं कम्पमाना तस्थौ। माता तु - 'वत्स पश्य तावत्। इयमेवास्मत् कुलनाशिका। गृहभेदकरी। कथय, त्वय्यस्यां वा मम को भेदः? इयमिदानीमैवैतादृशी। कालान्तरे किं वा न कुर्यात्'। इत्यादिना पुत्रस्य चित्तं प्रसादयामास। मातृदैवतस्स सूनुरपि यथार्थमेव तन्मेने। जगति को विकल्पयति जनन्या मधुराणि वचनानि। वधूस्तु मनसि स्वभागधेयं विचिन्त्य सदुःखं च सविस्मयं च कीलितेवावतस्थे। क्षणं सर्वेऽपि तूष्णीमासुः। अश्रूयत वहिः शकटध्वनिः। ततो देवसेनः निद्राया ज़ागरूक इव समुत्थाय सर्वानपि यथोचितं समामन्त्र्य निर्जगाम।

देवसेनः प्रतस्थे। इतस्तस्य माता सहसा ताटका बभूव। कीर्तिसेनाया अवस्थितिरतिदीना बभूव।

प्रथमं गृहकार्याद्यवेक्षणाय दास्यः कतिपया आसन्। इदानीं मातुर्निदेशात्तास्सर्वा विरेमुः। कृतेऽपि सकले कार्ये कदर्थनाप्यधिका बभूव। उत्तमवस्त्रादिकं निगूहितम्। विरहदुःखितायास्तस्या अनर्घवस्त्रादीनामपेक्षैव नासीत्तदा। अत एव तादृशवस्त्राभावमपि सा कुशलमेव मेने। किन्तु, अशनरहितं जीवनं पुनरतीव दुस्सहं लोके। या पूर्वं सायंप्रातः भक्ष्याणि भक्षयति स्म, अहनि रात्रौ च दधिघृतसहितं शाकसंभृतं शाल्यन्नं भुङ्क्ते स्म च - सैव कथमिदानीं कृष्णधान्यसेवनमेव केवलं, तदप्यर्धजठरायापि नालम् - सहेत। अथापि साध्वी सा पत्युर्हितार्थं तत्सर्वं सेहे।

कतिचिद्दिनानि व्यतीयुः। श्वश्रूः तावतापि क्लेशदानेन न तृप्तिमाययौ। सुखितामेव तां मेने। अत एव पुनरप्यधिकमुपद्रवं कर्तुमुपचक्रमे। निष्करुणा सा मनसि क्रूरतरं चिन्तयामास। परेद्यवि प्रावेशयत्तां गृहस्याधोभागे विद्यमानमन्धकारबहुलमन्तर्गृहम्। तत्रापि दिवसे एकदैव यत्किमपि दीयते स्म जठरदाहाय। अनशना सा दिने दिने 'कृशाङ्गी' ति पदं सार्थयामास। न केवलं पञ्चषा दिवसाः, मासा एव

व्यतीतप्राया बभूवुः। अथापि शिलाकठोरं श्वश्रूहृदयं न द्रवीबभूव। अहो ! कीदृशोऽयं दौर्जन्यविशेषः। प्रसङ्गेऽस्मिन् किं कुर्यात्सा तपस्विनी साध्वी। प्रथमं दैवं निनिन्द। वारं वारं पत्युर्गुणगणानावर्तयामास। तस्य प्रत्यागमनकालः सुदूरे वर्तत इति चिन्तयित्वा सोढुं न शशाक। अन्ते च किंकर्तव्यतामूढा आर्तत्राणपरायणं दीनशरणं भक्तवत्सलं देवदेवं श्रियःपतिं श्रीमन्नारायणं सभक्तिप्रकर्षं प्रणिपत्य यथामति संस्तुत्य शरणं प्रपेदे। तदवस्थैव सा निद्रितामात्मानं न विवेद। निद्रया गतः कश्चन कालः। तस्मिन्नेवावसरे समनुवभूव सुखं स्वप्ने। कुत्राऽपि देशान्तरे धनकनकवस्तुवाहनादिसमृद्धेन पत्या साकं विहरन्तीमिवात्मानं ददर्श। आनन्दपारवश्यादुन्मिमील नेत्रे। प्रभाता च शर्वरी।

प्राप्तायां दुःखावस्थायां प्रायो मतिः सर्वत्र विचरति। कथञ्चिदपि दुःखापनोदनाय यतते चेतः। अत एव कीर्तिसेनापि कस्यांचिद्रात्रौ तस्मिन्नन्तर्गृहे भित्तीस्समवलम्ब्य समन्ततस्संचचार। भित्तयस्सर्वा अपि शिथिला इवादृश्यन्त। भीतभीता सा कथमपि तूष्णीमासितुं मन आदधे। अत एव शयितुं भूमौ यदा बाहू प्रसारितवती पस्पर्श किमपि। भयचकिता संभ्रान्ता च सा 'किमिदं जानीयाम्' इति पुनः स्वयमेव सभयं पस्पर्श। प्रथमं कश्चन दण्ड इति, ततश्च खनित्रमित्यजानात्। तल्लब्ध्वा मनस्यचिन्तयत् - 'अहो मे दैवी सम्पत्तिः। भवतु। अनेनैव कार्यं साधयामि' इति ततः परं प्रतिदिनं स्वपानाय दीयमानेऽत्यल्पेऽपि जले, तस्याल्पाल्पभागेन प्रथममेव शिथिलां भित्तिं भूयोऽपि शिथिलयामास। खनित्रेण तेन भित्तौ रन्ध्रकरणाय प्रवृत्ता। केवलं रात्रावेव, तत्रापि स्वल्पीयसि काल एव करणीयतया रन्ध्रकरणाय कतिपयदिवसा व्यतीयुः। ततः कस्मिंश्चिद्दिवसे रात्रौ - प्रायः घण्टात्रयसमयो भवेत् रन्ध्रमार्गेण कश्चन प्रकाशस्समालोक्यत। विलोकनेन स्वस्या एव वासगृहमिवादृश्यत। सानन्दं सम्यग्ददर्श। कानिचन स्वभूषणाम्बरादीनि दृग्गोचराणि बभूवुः। तदानीमेव मनसि किमपि समालोच्य, भगवन्तं ध्यात्वा सत्वरमेव वासगृहं प्रविश्य सुलभ्यानि भूषणवस्त्रादीनि संगृह्य निःशब्दं भवनात् कुत्राऽपि निर्जगाम।

इतो वलभीपुरं गतेन देवसेनेन यापिता बहवो दिवसाः। स्वकार्यं तु न संपूर्णतया निरवर्ति। स्वनगरे यद्यपि जीवनव्यवस्था सम्यगेव कल्पिता, तथापि बन्धुविरहजनितपीडा दिने दिने ववृधे। 'अहं तु पुमान्। कार्यान्तरवशात् सहेय कथञ्चिद्विरहदुःखम्। सा तु बाला कथं सहेत। कार्यार्थमागतोऽहमल्पावशिष्टं कार्यं त्यक्त्वा कथं गच्छेयम्। दूरतरं च नगरम्। किं करोमि' इत्यादिचिन्तया व्याकुलो बभूव। ततः - 'कीदृशोऽहं मूढः। वात्सल्यैकजनन्या मम जनन्या सह वर्तते किल सा। का वार्ता दुःखस्यापि। शीघ्रतरं कार्यं परिसमाप्यैव गच्छेयम्' इति स्वयमेवात्मानं समाश्वास्य कथञ्चिद्दिनानि कानिचिन्निनाय।

इतो नागनगरे देवसेनस्य माता रन्ध्रितां भित्तिमवलोक्य प्रथमं चकिता बभूव। कवाटमुद्घाट्य यदा समालुलोके नादृश्यत वधूः। तदानीं तु मातृगृहं गता भवेदिति संदिहाना, आत्मनो दौर्जन्यमनुसन्धाय च नितरां बिभाय। एवमेव गताः केचन दिवसाः। पक्षः, मासौ इत्यादिक्रमेण व्यतीतेऽपि दिने वध्वाः मातृकुलादपि काचिदपि किंवदन्ती यदा न प्रसृता तदा मनस्येवमचिन्तयत् - 'देशान्तरादागत्य पृच्छते पुत्राय 'अनुदिनं समाश्वास्यमानापि मया वधूस्तव चिन्तयैव लोकादस्माददृश्या बभूव। किं करोमि हतभागिनी' इति कथयामि' इति। इत्थं धृतधैर्यापि 'अहो मे दुष्टता। महदन्याय्यमाचरम्। प्रायो नरकेऽपि नास्ति ममावकाशः। दैवाद्यदि पुनरपि लभ्यते नैवमाचरेयम्। हा पुत्रि कुत्र गतासि।' - इत्यादिप्रलापैः मुहुर्मुहुः मुमूर्छ। यथाकथञ्चिदसुखितैव कालं निनाय। अहो प्रेम्णो विचित्रा गतिः।

प्रायः प्रातरष्टघण्टासमयो भवेत्। कश्चन ग्रामः। तस्य निकटे विजने प्रदेशे समुपविश्य कश्चन चिन्तयन्निवादृश्यत। महता श्रमेण क्लान्तोऽपि स्पृहणीयमूर्ती राजकुमार इव मृगयाश्रान्तोऽवर्तत। स च मुहूर्तादिव शिरस्समुन्नम्य समन्तादालोक्य - 'प्रत्युषस्येव प्रस्थाय मया कुत्रागतमिति न जाने। अध्वश्रमस्तु नितरां बाधते। अयं तु कश्चन ग्रामः समासन्नः। अस्यां दशायां मातृकुलगमनमपि न शोभते। सर्वथा मम दैवतमेव लभेय। (आत्मानं विलोक्य) अहो सुसदृशो वेषः। एतादृशीं

ममावस्थां को वा जानीयात्। सत्यं, न खल्वियं कीर्तिसेना, अपितु कीर्तिसेनः। भवतु। ग्रामं प्रविश्य प्रथमं शरीरव्यापारमनुसन्धाय ततो यथोचितं कुर्याम्।' इति किमपि मनसि निश्चित्य प्रस्थितः। मध्येमार्गं स्थविरप्रायः कश्चन, नूतनपुरुषममुं दृष्ट्वा 'महाभाग, कोऽसि? कस्मादागतः? यं कमपि विचिन्वन्निव दृश्यसे किल। ब्रूहि किं वाऽभिलषसि' इति पप्रच्छ। नूतनपुरुषस्तु तस्य निर्व्याजदयालुतां वीक्ष्य 'जगति सौजन्यमीदृशमपि वर्तते वा' इति मनस्येव नितान्तं तुष्टः, प्रश्नमात्रेणैवापहृतमार्गायासः प्रत्यवोचत् - 'अकारणबन्धो, तवानुकम्पयैव कृतार्थोऽस्मि। अथापि वैदेशिकोऽहं कश्चन राजपुत्रः। कीर्तिसेन इति जनस्यास्य सङ्केतः। दायादहृतसर्वस्वो भ्रमामि। वलभीनगरे मम सुहृदस्ति कश्चन। तमासाद्य कथञ्चिज्जीवनयात्रां निर्वहेयमिति कोऽप्याशाङ्कुरो वर्तते। सुखैकवर्धितस्य मे दूरतरयात्रेयं महान्तं व्याकुलभावं सन्तनोति। किं करोमि' इति। ततः प्रथम आह - 'तरुण, समुद्रसेननाम्ना व्यवहरन्ति मां जनाः। अहमपि कश्चिद्वणिक्। ममाऽपि वलभीनगरे किञ्चिदस्ति कर्तव्यम्। अपि तु प्रस्थातुं पञ्चषदिवसैर्विलम्बो भवेत्। यदि तावत्पर्यन्तं भवानत्रैव विद्यते समागच्छेयमहमपि। इदमेव समीपे दृश्यमानमस्मद्गृहम्। एहि तावत्' इति व्याहृत्य तस्योत्तरमनपेक्ष्यैव निनाय गृहान्। स च शुभोदर्कं मन्वानः मनस्येव भगवन्तं पुरुषोत्तमं स्तुवन्ननुससार तम्।

सायंसमयः। अन्तरितो भगवान् मरीचिमाली। छिद्रान्वयिनीव कुमतिः समुपससर्प सान्द्रं तमः। तस्मिन्नेवावसरे अटवीनिकटवर्तिनि मार्गे पुरुषौ द्वौ जग्मतुः। तयोरेकः - 'कीर्तिसेन ! इदमेव वर्त्म मया कथितम्। अन्धकारात्प्रागेव निस्तीर्णमासीदिदम्। इदानीमपि न काचिद्धानिः। प्रायः क्रोशपरिमितमात्रं वर्तते वर्त्मेदम्। ततः काचित्पल्ली वर्तते। तत्रैव रात्रिमुषित्वा पश्चाद्व्रजावः' इतरस्तु प्रत्याह - 'महाभाग, समुद्रसेन ! प्रदेशमिमं दृष्ट्वा वेपते मे हृदयम्। पदमेव न प्रचलति। किं करोमि' इति। समुद्रसेनः सहास्यं 'किमये तरुण ! तरुणीवाचरसि? सति मयि किं भयम्?' इति जगाद। श्रुत्वेदं चकितोऽन्यः न किमपि

वक्तुं शशाक। कपटपुमान् किल सः। स्त्रीत्वं प्रकटीभवेत्कदाचनेति शङ्कया - 'यथा वा भवतु। दैवमेव शरणम्' इति मनसि संचिन्त्य तूष्णीमेव तमनुससार। एवमेवोभावपि किञ्चिद्दूरं ययतुः। सान्धकारतया मार्गः स्खलितः। कुत्र व्रजाव इत्येव नाऽजानीताम्। पादयोः कण्टकादिवेधनादरण्यमध्यमेव प्रविशावेति मेनाते। सहसा नातिदूरे कोलाहलः कश्चनाऽश्रूयत समुद्रसेनस्तु चोरा एवेति निश्चित्य - 'सखे, आवाभ्यामिदानीं कुत्रापि कञ्चित्कालं लीनाभ्यां भवितव्यम्। नो चेदनिष्टं भवेत्' इत्याह। कीर्तिसेना तु - 'अन्धकारः, कुत्र गच्छावः' इति चिन्तयित्वा '**भवतु, यद्यद्भवति तत्तदनुभोक्तव्यमेव।** भवानपि कुत्रापि निगूढो भवतु' इत्युक्त्वा कुत्रापि नातिगभीरे गर्ते समुपविश्योपरि शुष्कपर्णादिना आच्छादयामास यथा न कोऽप्यात्मानं जानीयात्। समुद्रसेनस्तु धनभीत्या समीपगतं कञ्चिज्जीर्णालयमविशत्। अहो ! दैवी गतिः। क्षणादेव चोराः तत्र तत्र संचार्य ददृशुस्तं जीर्णालयगतं वणिजम्। ततः परं किमु वक्तव्यं। तं हत्वा सर्वस्वमप्यपहृत्य -'अस्तु तावदन्यो यत्र कुत्राऽपि। तेन किमस्माकम्' इति जल्पन्तः, निर्विचारं यथायथं निर्जग्मुः। कीर्तिसेना परमुभयभ्रष्टा चिरं रुरोद। कर्तव्यमजानन्ती कुत्रापि गन्तुमशक्ता तत्रैवावतस्थे। मुहूर्तादिव मार्गप्रदर्शिनीव चन्द्रिका प्रादुरभूत्पूर्वस्यां दिशि। ततो यथाकथंचित् केनापि मार्गेण जगाम। प्रायो घण्टाद्वयसन्ततगमनेन प्राप पल्लीं काञ्चित्। 'पल्ली तु प्राप्ता। समयेऽस्मिन् कुत्र गच्छामि। कः परिचितः?' इत्यादिना चिन्तयन्त्यामेव तस्यां, कश्चन दशवर्षदेशीयो बालकस्तत्रैव गच्छन्नदृश्यत। सा तु तमाहूय 'ननु बाल, ग्रामान्तरं गन्तुकामनयाऽहं मार्गभ्रंशनेनात्रागमम्। ग्रामोऽयं कीदृश इत्यादि न जाने। यदि रात्रावस्यां शयितुमवकाशो दीयते प्रातरेवाग्रतो गच्छेयम्' इत्यप्राक्षीत्। स च बालः - 'भोः पुरुष, अस्त्यस्मदीया काचन कुटी। तत्र मम माता अहं चेति द्वावेव वसावः। दरिद्रा वयम्। शयितुं भूमिरपि न मनोरमा। यदि रोचते तुभ्यं नयामि भवन्त' मित्यब्रवीत्। सा तु बालकवचसा हृष्टा - 'वयमपि दरिद्रा एव। बाल, दरिद्रा एव दरिद्राननुकम्पन्ते। गच्छ, अनुगच्छामि त्वाम्।' - इत्युक्त्वा कुटिं प्रस्थिता। कृतयथोचितभोजना तत्रैव तां निशां निनाय।

अपरेद्युः प्रातरेव तस्मात्कुटीरान्निर्गन्तुमैच्छत्कीर्तिसेना। बालकस्य माता वृद्धा तु प्राह - 'वत्स, वलभीनगरं गन्तव्यमित्याह भवान्। इदानीमपि बहुदूरे किल तत्। पादाभ्यामेव यास्यामीत्यपि यद्वदसि तदपि शशश्रृङ्गसम्पादनसममेव। तव तु कोमलं वयोवपुश्च। अपि चैकाकी प्रस्थितोऽसि। अतश्चात्रैव कतिपयदिवसान् विश्रम्य गम्यताम्' इति। तदाकर्ण्य सा सविनयमाह - 'अम्ब ! यदाह भवती तत्सर्वमपि सत्यमेव। अपि च, राजपुत्रो वा राजपुत्री वा सुखकाले यथा सुखमनुभवति तथा दुःखकाले दुःखमनुभोक्तुमपि जानातीत्यमुं विषयमपि जानात्येव भवती। अत एव कर्तव्यैकपरायणमिमं जनमनुजानातु भवती पुनर्दर्शनाय।' इति। आकर्ण्य वचनमिदं तादृशनिश्चयज्ञानेन च सुतुष्टा - 'वत्स, सत्यं राजपुत्रोऽसि त्वम्, यस्मिन्नेतादृशी कर्तव्यता जागर्ति। कर्तव्यशीलानां सच्चरितानां भवादृशानां न कदापि कार्यं विफलं भवेत्। पौरुषप्रधानं जनं दैवमप्यनुगृह्णात्येव। न जातुचिदपि दैवमात्रशरणाः पौरुषप्रयत्नरहिताः श्रेयोभागिनो भवेयुः। भवतु साधयतु भवान् समीहितसिद्धये। अपितु ह्य एव मार्गस्खलनेन विघ्नितप्रयाणोऽसि। बह्वातपोऽयं दिवसश्च। अतो मध्याह्नात्परं मन्दीभवति चातपे सुलभभ्रमजनकं वनमार्गमुल्लङ्घयितुं त्वया साकं मार्गप्रदर्शकं कमपि प्रेषयामि - इत्यकथयत्। सा तु 'अम्ब, **अकारणबान्धवाः खलु सत्पुरुषाः।** मूकीभूतोऽस्मि सौजन्येनाऽनेन। यथाह भवती' इत्युक्त्वा विरराम। अभुञ्जत सर्वे। मध्यमहरपि व्यतीतप्रायम्। मार्गदर्शी कश्चन वृद्धो - जात्या प्रायः शबरो भाव्यः - समाजगाम। कीर्तिसेना तु वृद्धां प्रणम्य प्रतिगृहीताशिषा तं पुरस्कृत्य निर्ययौ।

तावुभावपि वनमार्गे किमपि संलपन्तौ प्राचलताम्। तस्मिन् समये कीर्तिसेना कमपि वक्रपथं प्रदर्श्य - 'भोः पुरुष, प्रायः अस्मिन्नेव स्थले मार्गादहमस्खलमिति मन्ये' इत्याह। वृद्धस्तु - 'भवेत्। वनमार्गा एवेदृशाः। बहुत्र मतिभ्रमं जनयन्ति। अपि तु मार्ग इदानीमतिक्रान्तप्राय एव। इतः परं किंचिद्दूरं गताभ्यामावाभ्यामन्यः कश्चन चतुष्पथ इव भ्रमजनकः प्रदेशोऽस्ति। तथापि भ्रमस्य न कोऽप्यवकाशः। अनेनैव

पथा ऋज्वेव यदि गम्यते वसुदत्तपुरं प्राप्यते' - इत्यवदत्। तच्छ्रुत्वा नितान्तसंकोचितस्वभावा सा पूर्वं तस्मिन्नेव मार्गे स्खलितापि, वनमार्गादनुभूतभयस्वरूपापि, निःशरणापि दैवमेव शरणं मन्वाना - केवलं भवितव्यतावशेन भवेत् - प्राह तं वृद्धम् - 'अतीतप्रायो मार्ग इति किलाऽवदीः। अग्रिमं मार्गमपि सूचितवानसि। कालश्च महान् गतः। प्रतिनिवर्त्यमानो ग्रामश्च ते दूरस्संवृत्तः। मम तु गन्तव्यो देशस्समीप एव वर्तत इति श्रुत्वा महानानन्दः। अन्धकारोऽपि दिगन्तराणि स्थगयन्निव दृश्यते। वृद्धस्य ते माभूद्बाधा। निवर्ततां भवान्' इति। वृद्धस्तु हसन्निवाऽऽह - 'ननु बाल, न केवलं वयसि, वचस्यपि बाल एवासि। यत्र स्खलसि तत्रैव पण्डितायस इति हास्यमेतत्। अन्यच्च वृद्ध इति मामनुकम्पसे खलु। वृद्धोऽप्यहमाधुनिकेभ्यस्तरुणेभ्यो न हीनः। मध्यरात्रेऽपि यत्र कुत्रापि गन्तुं समर्थः। इदानीं न किमपि कष्टम्। तूष्णीं गच्छ' इति। श्रुत्वेदं ताडितेव जाताप्यानन्दिता प्रथमं किमपि वक्तुमजानन्ती ततस्तैस्तैरालापैर्मार्गमवजगाहे।

किञ्चिद्दूरं गतवतोस्तयोः वृद्धस्सहसा किमपि वृक्षमूलमभजत। कीर्तिसेना तु परिवर्तितकन्धरा जगाद सहासम् - 'किं भो महापुरुष, तरुणेभ्यो न हीनः किल त्वम्। किमित्युपविशसि? उत्तिष्ठ यावः' इति। वृद्धस्तूष्णीमेवास। सा तु भूयोऽप्याह किमित्यार्य, न सल्लपसि? कोपो वा मयि? नेतः परं हसिष्यामि। क्षमस्वैकवारम् इति। तथापि वृद्धो यदा तूष्णीमेवासीत्तदा समीपमुपगम्य ददर्श। दर्शनमात्रादेव तत्रास। ततः किञ्चिदिव धृतधैर्या वृद्धस्याङ्गानि पस्पर्श। पादादिशरीरभागाः शुष्केन्धनजालानीवाऽदृश्यन्त। श्वासोऽपि मन्दतर एव। दृष्ट्वा नितान्त मुद्विग्ना झटिति समीपगतां वारिधानीमादाय तस्य मुखे कतिचन वारिबिन्दून्निषिच्य, मस्तकस्योपर्यपि जलं सिषेच। तदानीमपि तदवस्थ एव वृद्धः। सा तस्य कलेवरं चालयामास। न किञ्चिदपि प्रयोजनम्। ततः शून्यहृदया सा चिरमरोदीत्। क्षणादेव रोदनश्रवणाद्वा, जलसेकसंबन्धादेव वा, वक्तव्यशेषशक्तिविशेषमात्राद्वा वृद्धः मन्दमन्दमेवं व्याहर्तुमारभत - 'भद्र - - जलं - - ' सा तु पुनरप्यास्ये किञ्चिज्जलं

सिषेच। वृद्धस्तु नेत्रे किञ्चिदुन्मील्य - 'भद्र-- क्रूरतरोऽयं ---विधिः न खलु मम--जीविताशया ब्रवीमि। ---जरठोऽहम्। नास्ति मत्कृते कापि चिन्ता। - -- क्रूरतरविधिवशं गतोऽसि--। अतो दूयते मे चेतः। ---विषमपि तावन्न बाधते मां --- भद्रमुख---हा! --जलं (किंचिज्जलं पीत्वा) भद्र --- नातिदूरे तपस्वी---समीपे वसु--दत्त---पुरम्' इत्यादिकथयन्नेव निश्चेष्टः पतितः। कीर्तिसेना तु बहुधा दैवं निनिन्द। ' क्व नु राजोचितकुले प्रसूतिः। कुत्रेदमभागधेयम्। क्वासावनुरूपदाम्पत्यलाभः। क्व वाऽसौ विरहप्रसङ्गः। हा! नृशंसे श्वश्रु, कृतार्थाऽसि। यदेवं विपिने विपत्स्ये। अथवा, अपुण्याया ममैवाऽयं दोषः। किमिति वृथा जनमन्यं दूषयामि' इत्यादिभिः प्रलापैः बहुधा चक्रन्द।

कियन्तं कालमेवं विललापेति सा नाजानात्। अपितु कदाचिन्नातिदूरे क्रियमाणेन कोलाहलेन केनचन सा जजागार। कोलाहलमनुसृत्यैव भयंकर्य आकृतयोऽदृश्यन्त। प्रकृत्या भीरुस्सा तादृशभयंकराकृतिभिः भयंकरवचनैः भयंकरस्वभावैश्च नितरां बिभाय। अवलोकनेन काचन राक्षसी स्वपुत्रैरावृतेति क्षणादेव जज्ञौ। तस्मिन्नन्तरे तेषां परस्परा आलापाः प्रादुर्बभूबुः।

पुत्राः - अम्ब, महती बुभुक्षा। इतो गतया त्वया महान् काल आसीत्। किमानीतम्। कथय, देहि किमपि शीघ्रम्।

राक्षसी - पुत्रकाः, इतः प्रस्थिताऽहं सर्वामप्यटवीमाटम्। अद्य कुतोऽपि कश्चिदपि न लब्धः प्राणी। किं करोमि?

कीर्तिसेना तु तच्छ्रुत्वा - 'अहो महान् प्रमादः। नूनमिदानीं राक्षसैः ग्रासीकृताऽस्मि। दुःखितया मया महानपि कालो नोपलक्षितः। वृद्धस्तु - 'तपस्वी--- नातिदूरे---' इत्यादिना समीपे विद्यमानं कमप्याश्रममसूचयदिति भाति। तत्रापि न गता। स्वग्रामे बन्धन एवावशिष्टाऽभविष्यं यदि कालान्तरे वा **'जीवन् भद्राणि पश्यति'** इति न्यायेन श्रेयस्विन्यभविष्यम्। इदानीमुभयतो भ्रष्टा भिक्षुकीव सर्वथा

नष्टाऽहम्। किं करोमि इति चिन्तयन्ती, स्वाश्रयभूते तरौ महान्तं कोटरं दृष्ट्वा। तत्रैव विलिल्ये। अहो बलीयसी खलु जीविताशा प्राणिनाम्। यतस्सा राक्षसभीता भयंकरजन्तूनामाश्रयभूतेऽपि महति कोटरे निश्शङ्कं विवेश। तथा कोटरं प्रविश्यापि राक्षसीयं भयं न तत्याज अवहिता राक्षसव्यतिकरमेव पश्यन्ती स्थिता। तदा राक्षसबालकाः पुनरेवं पप्रच्छुः - 'अम्ब, डाकिनी किल किमपि दास्यतीति त्वयोक्तम्?'

राक्षसी - डाकिन्यपि नास्ति, शाकिन्यपि नास्ति। महोदरी सा। कोटिजनमांसमप्येकदैव गिलति। दशकोटिभाण्डगतं रक्तमपि नालमिदानीं तस्या उदराय। दारिद्र्यबहुलेऽस्मिन् काले जठरमपि बृहत्तरं भवति। किं कुर्मः?

पुत्राः - नश्यतु सा वराकी। अम्ब, नूतनं न लब्धं चेदस्मिन् कोटरे संचितं खलु तदेव देहि नः। एहि शीघ्रम्। (इदं तु वचनं श्रुत्वा कीर्तिसेनाया हृदये सहस्रमुसलावधातनं युगपदेवारब्धम्। श्वासमपि निरुद्ध्य कीलितेव तस्थौ।)

राक्षसी - पुत्रकाः, संचितं तु वर्तत एव। भवतु, ददामि। रहस्यमिदमन्यच्छृणुत।

पुत्राः - कथय कथय।

राक्षसी - सर्वप्रयत्नेनापि कमप्याहारं यदा न प्रापं तदा भैरवमहं प्रार्थये।

पुत्राः - कस्स भैरवः?

राक्षसी - दैवतं खल्वस्माकम्। अस्माकं कष्टसमये वा सुखप्रसङ्गे वा स एव स्मरणीयः।

पुत्राः - प्रार्थितेन तेन किमुक्तम्?

राक्षसी - वत्से, खरदूषणादीनां श्रेष्ठतरे कुले समुत्पन्नाऽसि। किं ते भयम्? अलं चिन्तया। अस्ति वसुदत्तपुरे वसुदत्तो नाम राजा। (कीर्तिसेना सकुतुकं शृणोति)

पुत्राः - अम्ब ! कियद्दूरे वसुदत्तपुरम्?

राक्षसी - अस्ति समीप एव। स नरपतिरेवाधिपतिरस्याप्यरण्यस्य।

पुत्राः - किमनेन कथाश्रवणेन?

राक्षसी - स कदाचिन्मृगयायै वनं गत्वा श्रान्तस्तत्रैव कुत्रचित्सुप्तः।

पुत्राः - ततस्ततः।

राक्षसी - सुप्तस्य तस्य कर्णे सहस्रपादः कृमिः कश्चन प्राविशत्। गाढनिद्रया स तु नाजानात्।

कीर्तिसेना - हा ! महत्कष्टं खलु तपस्विनः।

राक्षसी - स यदोत्थितस्तदा शिरोवेदनामेवान्वभवत्। तस्या निमित्तं मृगयाश्रमं मन्वानो गृहानगात्।

पुत्राः - स कीदृगिदानीम्?

राक्षसी - मस्तकं प्रविष्टः कृमिरिदानीं दिनेदिने बहुधा वर्धते। महतीं पीडामनुभवति राजा। केवलं शिरोवेदनेति ज्ञात्वा भिषगेकैकोऽपि यत्किमप्यौषधमदात्। यथार्थवृत्तं केनापि नाज्ञायत। कतिपयैरेव दिवसैः मृत्युवशो भवति नरपतिः।

कीर्तिसेना - हा! निष्प्रतिक्रियो विपद्यते खलु राजा। यदि कथञ्चिन्नीयते रात्रिः गत्वा भिषग्भ्यो निवेदयामि यथार्थम्।

पुत्राः - अम्ब, ततः किम् ?

राक्षसी - ततो युष्माकं मासषट्कपर्यन्तं सुखभोजनं भवति। मायया तस्य शरीरमाविश - इत्यनुजग्राह भैरवः।

पुत्राः - अहो भैरवस्यानुग्रहः। सत्यं दैवतमेवास्माकम्। यः किल षड्रसरसनेन मांसलितदेहस्य राज्ञो देहं प्रादर्शयत्। भवतु तावत्। नास्ति वा परिहारोऽस्य रोगस्य ?

राक्षसी - कुतो नास्ति ? अस्त्येव। प्रताप्य, तप्तमेव घृतं शिरसि विलिप्य राजानं मध्याह्ने कठिनातपे समुपवेशयेत्। तस्य पार्श्व एवानातपे प्रदेशे शीतलं जलं संपूर्य कुम्भमेकं निवेशयेत्। राज्ञः कर्णस्य घटस्य च संसक्ततया नालिकामेकां प्रकल्पयेत्। ततो मस्तके नितान्तं तापमसहमानाः कृमयः शीतलं प्रदेशं विचिन्वन्तः नलिकामुखात् स्वयमेव जलसंभृते घटे निपतेयुः। अनया रीत्या रोगोऽपि नष्टो भवेत्।

एतदाकर्ण्य कीर्तिसेना मनस्येवमचिन्तयत् - '**अहो! दैवमहिमा। यत् दुष्टैरप्यमीभिः महानुपकार एव कृतः** इति जानामि। यदि कदाचिदियं रात्रिर्निर्बाधं नीयेत, यदि च निर्विघ्नं वसुदत्तपुरं समासादयेयं तर्हि तस्यामयं नाशयित्वा, सुखितस्य तस्य साह्येन सुखेनैव पत्युरागमनं प्रतीक्षे इति। एवं क्षणमात्रमेव कल्पनासुखसाम्राज्ये यावदास्त सा तावदेव पुत्रपरिवृता राक्षसी कोटरसमीपमेवाऽगात्। समीपमागच्छन्तीमेव भयंकरीं तां वीक्ष्य कीर्तिसेना हृतचेतना बभूव। राक्षसी तु समीपगतं कोटरान्तरं विवेश।

अक्षिणी प्रोन्मील्य यदाऽपश्यत्कीर्तिसेना तदा प्रभाता तामसी रात्रिः। भगवान् सहस्रकिरणः किरणैरनुरञ्जयामास दिग्विभागान्। विहङ्गमाः विटपिभ्यस्समुड्डीय गगनान्तराले विरेजुः। कञ्चित्कालं कोटर एव स्थिता समन्तादवलोक्याऽपि यदा कीर्तिसेना राक्षसीं वा भयकारणमन्यदपि वा नाद्राक्षीत्तदा शकुन्तीव कोटरान्निर्गता। निर्गत्य च पूर्वकथितस्य मुनेः आश्रम एव वसुदत्तपुरस्य मार्गसूचक इति मनसि परिभाव्य तमेवाश्रमं विचिन्वन्ती प्रस्थिता। किञ्चिद्दूरं गत्वा स्वाभीष्टवरदायिनीं मृदुमन्दहासां स्वयमेवाभिमुखमागतामिव देवतां कांचित् कलकलनादमेदुरां तरङ्गिणीमपश्यत्। प्रसन्नपावनसलिलां तां वीक्ष्यैव विगतश्रमा बभूव। ततः तरङ्गिणीमवतीर्य कृतयथोचितशौचा पिपासाप्रतीकारं च कृत्वा किंञ्चिदिव विश्रम्य पार्श्ववर्तिनीं सरणिमनुससार। अनतिदूर एव ददर्श कदलीनालिकेरपनसजम्बूजम्बीरादिफलप्रधान-तरुराजिराजितं, मल्लिका-मालती-पाटलाशोकचम्पकप्रभृति-पुष्पद्रुम परिकर्मितं, तमालन्यग्रोधप्रमुखच्छायापादपैरभिशोभितं, तत्र तत्र स्वेच्छया हरितदर्भाङ्कुरादिग्रहणलीलया संचरणशीलानां वन्यपशूनां निवहै र्नयनानन्दकरं, दर्शनमात्रादेवोद्वेगहरं शान्तमाश्रमप्रदेशम्।

किञ्चिदग्रतो गत्वा तत्रत्यैस्संविधानैः तामेव पर्णशालां मेने। तत्र हि कुटीरं परितो विद्यमानेषु तरुगुल्मादिषु धौतानि वस्त्राणि शोषणार्थं विस्तृतानि। वटवः केचन संगृहीतान् दर्भान् समिधश्च शोधयन्तः नूतनच्छात्रानध्यापयन्तश्च, गृहीतपाठानावर्तयन्तश्च, स्वयं विहरन्तो वन्यमृगानपि विहारयन्तश्च, केचिद्विविधानि फलान्याहरन्तो

विविधान्मृगविहङ्गमादिपोतानाहारयन्तश्च, विनोदार्थं परस्परं प्रहरन्तः प्रहार्यमाणाश्च, विनोदेनापि सहसा समुत्पत्स्यमानं कलहं स्वयमेव परिहरन्तश्च, शास्त्रादिविषयेषु विवदमानाश्च समाधास्यमानाश्च, स्पर्धमानाश्च हसन्तो हास्यमानाश्चासन्। अन्ये तु प्रवयसः केवलं ध्यानमग्नमानसा बभूवुः।

तस्मिन्नेव समये कुतोऽपि समाजगाम कश्चन जटी, दण्डी, वल्कली च यतिः। यं दृष्ट्वा स्तम्भितेवाऽभवत्सा विप्रपरिषत्। यश्च निस्सङ्गोऽपि विप्रपरिवृतः, निर्मत्सरोऽपि ज्वलितस्तेजसा, वाचंयमोऽपि वाचस्पतिः।

कीर्तिसेना किञ्चिद्दूरादेव सर्वमिदं विलोक्य संजातहर्षा सत्यमयमेवाश्रमो वृद्धेन सूचितः। मुनिरप्ययमेव भवेत्। अस्मिन् महानुभावे यथावृत्तवृत्तकथनं न हानये। अपि तु महते श्रेयसे कल्पेत' इति चेतसि परिचिन्त्य यतेस्समीपमुपगम्य प्रणम्य यथासमयं यथानुगुणं च स्ववृत्तान्तं विज्ञाप्य तेन च समाश्वास्यमाना सुखेनैव दिवसमशे ं तत्रैव निनाय।

प्रभातायां च शर्वर्यां कीर्तिसेना विविच्य मुनेराश्रमं विलोक्य नितरां तुतोष। स्वयमेवं मनसि चिन्तयन्ती - 'बहुतरं रमणीयोऽयमाश्रमः। सर्वमतसंनिधानेन दैवसृष्टौ समतां प्रदर्शयति। अत्रत्यास्सर्वेऽपि अधीतस्वस्वमतग्रन्था अपि परमतसहिष्णुतया विदितवेदितव्या इतरदर्शनेषु। न केवलं ज्ञानमार्गरता एते, अपि तु यथा कालं यथानुकूलं च विज्ञानपक्षपातिनश्च। अत एव दयादाक्षिण्यादिमङ्गलगुणगणभरिता यथा, तथा अशनवसनादिजीवनौपयिकेषु व्यवहारेष्वपि कुशला एते। इतो निर्गतानां वटूनां न काचिच्चिन्ता। आश्रमवृत्तवर्तिनोप्येते विदितलोकतन्त्राः। सर्वेऽपि कलाविदः, निर्मत्सरा अकृत्रिमसुहृदश्च। किं बहुना ? यदि निखिलेऽपि भारते देशे प्रसरेयुरीदृश्यो विद्याशालाः तर्हि धन्या वयम्। धन्या वयम्। धन्या भारतीयाः इत्यादीनि च; चित्रीयमाणा क्षणमिव तमपि दिवसं निनाय।

परस्मिन् दिवसे कीर्तिसेना मुनिवरमभिवन्द्य वसुदत्तपुरं प्रययौ। पुरोपकण्ठे ददर्श कंचन शबरम्। तस्य दर्शनेन सा मनसि - 'अयं च कश्चन शबर इव भाति। प्रायो वसतिस्थानमप्यस्य नगरस्य समीपगते वनप्रायप्रदेश एव वर्तेत। यद्यत्रैव ममापि वसतिः कल्प्येत तर्हि मार्गेणानेनैव समागच्छन्तं पतिमनायासेनैव पश्येयम्। अपि च कश्चन वनौका इति मूलिकाभिज्ञ इति चात्मानं प्रकटय्य राज्ञः पीडां परिहरामि। किं च, वनौकसो नगरे निर्निमित्तं बहुकालं न तिष्ठन्तीति प्रथामनुसृत्य पत्युरागमनपर्यन्तमात्मानं गोपायितुं शक्यम्।' इत्यादिविषयान् परिचिन्त्य शबरसमीपमगमत्। स च 'को भवान्? किमत्रागमनकारणम्?' इत्यपृच्छत्। कीर्तिसेना तु - 'अहं तु कश्चन वनवासी। सर्वत्राह मटामि। न कुत्रचिदपि किमपि मे कार्यं वर्तते। नास्तीत्यपि वक्तुं न शक्यम्। त्वं पुनः कः? कुत्रत्यः? किमभिधानमिदमग्रे दृश्यमानं नगरम् ?' इति प्रत्यपृच्छत्। शबरस्साश्चर्यमाह, वनवासी भवानिति श्रुत्वा महदाश्चर्यं मे। नहीदृश्य आकृतयो वनवासोचिताः। अस्तु तावत्। अत्रत्यो वन्य एवाहमपि। शबराणामधिपतिं जानन्ति मामत्रत्याः। इदमेव नगरं वसुदत्तपुरम् इति। पुनरप्राक्षीत्कीर्तिसेना - 'तदेतत्किल वसुदत्तपुरं यत्र राजा वसुदत्तः प्रशास्ति।' शबरः -'आं सत्यमेतदेव।' कीर्तिसेना - 'अप्यनामयं राज्यं राजा च?' शबरः - 'महाभाग, किं ब्रवीमि? व्याधिपीडिते राजनि कुशलमप्यकुशलं राज्यम्' कीर्तिसेना - 'तर्हि व्याधिग्रस्तो राजा? को व्याधिः? चिकित्सितो न वा?'

शबरः - 'इदमेव कष्टतरम्। व्याधिमूलमेव न केनापि ज्ञायते। प्रतिक्रिया परं या काचित् क्रियते। किं प्रयोजनम्? अनुदिनं वर्धते व्याधिः। महतीं पीडामनुभवति तपस्वी।'

कीर्तिसेना सानुकम्पमाह - 'भोः पुरुष, जानामि वनपरिचयात्काश्चिच्चिकित्साः। यदि मां नयसि राज्ञस्समीपं प्रायो नाशयेयं व्याधिमिति मे मतिः। इयं च मे काचन दैवीशक्तिरित्येव जानीहि।'

शबरस्तु सानन्दमवादीत् - 'अहो अस्मद्भागधेयम् ! इदानीमेव नयामि त्वां राजसमीपम्। कुतो विलम्बः? एहि गच्छावः।'

कीर्तिसेना ताब्रवीत् - 'ननु मित्र, शृणु किञ्चिदिदं मम वचनम्। व्याधिर्नाश्यते। तत्र न कापि विप्रतिपत्तिः। अपि तु कतिपयदिवसपर्यंन्तमस्ति मे कश्चन व्रतविशेषः। तावन्तं कालं नगरे न वसामि। अपि च मया क्रियमाणा चिकित्साऽपि गूढतमा भवेत्। मम परिचयोऽपि लोकस्य मा भूदाव्रतसमाप्ति' इति।

शवरस्तु सखेदं सप्रमोदं साश्चर्यं चाह -

'महामते, यथाह भवांस्तत्तथैव। राज्ञो व्याधिमोचनं परमावश्यकम्। व्रते निर्वर्तिते भवतः परिचयो भविता जनानामिति मे संभावना। तदैव मम परितोषो भवेत्। कथं वा मन्यते महाभागः' इत्युक्त्वा विरराम।

कीर्तिसेना - 'भवतु स्वयमेव ज्ञायते।' इत्युवाच। ततः शबरः - 'महाभाग, अस्ति समीप एव वनप्रायप्रदेशे तपोभूमिरिव साक्षाद्वसतिभूमिः अस्माकम्। विविक्ता मनोरमा च। यदि भवाननुमन्यते तर्ह्यागच्छतु महाभागः! यथाभिलषितं च निभृते प्रदेशेऽस्मिन्नुषित्वा विचारयत्वग्रिमं कर्तव्यशेषम्' इत्युक्त्वा निनाय तां स्वावसथम्। ---- सप्ताहानि गतानि।

कदाचन कीर्तिसेना विविक्ते तस्मिन् कुटीरे समुपविश्य किमपि पत्रं मुहुर्मुहुः पपाठ। व्यधिरहितेन राज्ञा दत्तं सन्मानसूचकं पत्रमेव तदासीत्। तत्र राज्ञा स्वहस्तेनैवं लिखितमासीत् - "श्रीमद्राजाधिराज - राजपरमेश्वर - वसुदत्तसंस्थानाधिपतिः वसुदत्तनरपालस्तत्र भवतः पौरान् कीर्तिसेनाभिधं भिषग्वरं च प्रणम्य सर्वेषामपि समक्षमेवं विज्ञापयति।

'स्वस्ति श्रीमतेऽत्र भवते वनवासिने केवलमस्मदनुग्रहार्थमागत वते कीर्तिसेनाय। यः किल साक्षाद्धन्वन्तरिरिवागत्य व्याधिमपनुद्य कर्तव्यशेषपरिपालनायैवाऽस्मान् जीवयित्वा स्वानुकम्पामदर्शयत्। प्राणदात्रे तादृशाय महात्मने भुवनैकदेशलब्धप्रतिष्ठोऽयं जनः किं वा समुचितं सन्मानं कर्तुं शक्नुयात्। अथापि वनौकसे निस्पृहायापि तस्मै परमसन्तुष्टोऽयं

जनः अर्धराज्यं सभक्तिप्रकर्षं वितरतीति विजानन्तु भवन्तः। इतः परं महात्मनस्तस्य स्वेच्छोपयोगयोग्यमिदं दक्षिणार्धं राज्यमिति, मयीव तस्मिन्नपि सर्वथाऽनुरक्ता भवन्तु भवन्त इति च भूयो भूयस्संप्रार्थये'
- लोकसेवको राजा वसुदत्तः'' इति।

पठित्वा मनस्येवमचिन्तयन् - 'अहो ! स्वप्नमिव सर्वमेतत्पश्यामि। कुत्र तद्बन्धनागारम्? कथंचित्तस्मान्निष्क्रान्तायाः क्व वा वणिक्सहवासः। तत्राप्यरण्ये तस्य नाशो मम संतारणमिति किमिदं नाम, राक्षसरूपमृत्युग्रस्ताया अप्यत्रागमनानुकूलतेति कोऽयं विधिविलसः, सर्वथा दुश्चिन्त्यो दैवमहिमा' इति। क्षणं तूष्णीं स्थित्वा पुनरपि - '**विनायकं प्रकुर्वाणो रचयामास वानरम्**' इति गाथार्थः मामेव स्पृशति खलु। वलभीनगरं गन्तुकामा कुत्रावस्थिताऽस्मि। किं वा कृतवत्यस्मि। यद्यपि गूढमेव बहवो दिवसा नीताः। पतिसमागमनसूचनमपि नास्ति। इतः श्वश्रूजनवार्ताऽपि न श्रूयते। एवं बन्धकीमिव गृहान्निष्क्रान्तां मां भूयः परिगृण्हीयाद्वा भर्ता? गृहत्यागिन्यां गृहिण्यां कथं वा विश्वसेत्पुरुषः ? कतिपयदिवसक्लेशमसहमाना कामप्यसंभावनीयां स्थितिं प्राप्ताऽस्मि। बन्धन एव स्थितां मां दृष्ट्वा कदाचिद्दयेतेत्यपि वक्तुं शक्यं - यद्यहं तत्रैवावर्तिष्यम्। सर्वथा दोषभाजनमेवाऽभवम्। किं करवाणि ?' - इत्यादिना बहुधा चिन्तयित्वा शून्यहृदया कर्तव्यमजानाना देवदेवमेव ध्यायन्ती सुष्वाप।

वलभीनगरान्निवर्तमानो देवसेनः मध्येमार्गं कीर्तिसेनां ददर्श। स्वनगरे मातृकृतबन्धनम्, बन्धनान्निष्क्रमणम्, दूरतरप्रयाणप्रयासः, अटव्यां संभावितराक्षसविपत्तिः, आश्रमसंदर्शनम्, वसुदत्तपुराधीशस्य व्याधिविमोचनम्, तुष्टेन राज्ञा सम्माननम् - इत्यादिकं सर्वमपि यथावृत्तं कथयामास कीर्तिसेना तस्मै। एतेषु दिवसेषु श्वश्रूरप्यस्वस्थशरीरेति वार्ताऽपि कथञ्चिदश्रावि। तदा कीर्तिसेना भर्तारमेवं ययाचे - 'नाथ' मातुरस्वस्थताया अहमेव पापकारिणी कारणम्। यदि सत्यमेव मयि प्रसन्नो भवान् तर्हि शीघ्रमेवानयतु मातरम् इति। कतिपयैरेव दिवसैः देवसेनो मातरमानयामास। मातापि प्रथममिव सुते वध्वां च निर्विशेषतया प्रीतिपूर्णा बभूव।

वसुदत्तपुरे राजपुरस्सराणां सर्वेषामपि जनानां कीर्तिसेनायाश्चरितं विदितमासीत्। अत्यन्तं मुदितान्तरङ्गस्स राजा राज्यर्धभागप्रदानपुरस्सरं देवसेनं राज्ये समभिषिच्य महोत्सवं चकार।

देवसेनः राज्यप्राप्त्या लोकसेवायास्सदवकाशोऽयमिति मुमुदे। कीर्तिसेना च सुगृहीणीत्वलाभेनात्मानं कृतकृत्यां मेने। माता तु पुनस्समुत्पन्नाविव वधूपुत्रौ विलोक्य परममानन्दं भेजे। धनपालादयोऽपि परम्परया श्रुतवृत्तान्ताः नितरां मुमुदिरे। प्रजा अपि नूतनराजसंदर्शनेन प्रदर्शितमहोत्सवाः हृष्टचित्ता बभूवुः। किं वहुना ? पुरं सकलमप्यानन्दमयमासीत्।

**बालोपयोगिगद्यानां वैरल्यमनुचिन्तयन्।**
**नृसिंहोऽरचयद्गद्यं परिगृण्हन्तु साधवः ॥ ३ ॥**

**समाप्तोऽयं ग्रन्थः**

# ಕೀರ್ತಿಸೇನೆಯ ಕಥೆ

ಸೋಮಪ್ರಭೆಯು ಕಳಿಂಗಸೇನೆಗೆ ಹೇಳುತ್ತಿದ್ದಾಳೆ, 'ನನ್ನ ನಿನ್ನ ಸ್ನೇಹ, ನಿನ್ನ ಮದುವೆಯಾಗುವತನಕ, ಆಮೇಲೆ ನಾನೆಲ್ಲೋ ನೀನೆಲ್ಲೋ! ಸಖಿ ತನ್ನವಳಾದರೆ ಸಖಿಯ ಗಂಡ ತನ್ನವನಾದಾನೇ? ಅತ್ತೆಯೆನ್ನುವವಳು ಸೊಸೆಯನ್ನು ಹೆಣ್ಣು ತೋಳವು ಕುರಿಮರಿಯನ್ನು ತಿನ್ನುವಂತೆ ಕಿತ್ತು ತಿಂದುಬಿಡುತ್ತಾಳೆ. ಅದಕ್ಕೆ ಕೀರ್ತಿಸೇನೆಯ ಕಥೆಯನ್ನು ಹೇಳುತ್ತೇನೆ ಕೇಳು!' ಎಂದು ಅದನ್ನು ಹೇಳಿದಳು :-

ಪಾಟಲೀ ಪುತ್ರದಲ್ಲಿ ಧನಪಾಲಿತನೆಂಬ ವರ್ತಕನಿದ್ದನು. ಅವನು ತನ್ನ ಮಗಳಾದ ಕೀರ್ತಿಸೇನೆಯನ್ನು ಮಗಧರಾಜ್ಯದ ದೇವಸೇನನೆಂಬ ವರ್ತಕನಿಗೆ ಕೊಟ್ಟು ಮದುವೆ ಮಾಡಿದನು. ದೇವಸೇನನೇನೋ ಒಳ್ಳೆಯವನು. ಅವನಿಗೆ ಹೆಂಡತಿಯ ಮೇಲೆ ಇದ್ದ ಪ್ರೇಮವನ್ನು ನೋಡಿ ಅವನ ತಾಯಿ ಹೊಟ್ಟೆಯಕಿಚ್ಚಿನಿಂದ ಉರಿದುಬೀಳುತ್ತಿದ್ದಳು. ಅದನ್ನೆಲ್ಲಾ ಅವಳು ಗಂಡನಲ್ಲಿ ಹೇಳಿಕೊಳ್ಳುವುದಕ್ಕಾಗುತ್ತಿರಲಿಲ್ಲ. ನೀಚ ಅತ್ತೆಯರ ಕೈಕೆಳಗೆ ಬಾಳಬೇಕಾದ ಸೊಸೆಯರ ಪಾಡು ತುಂಬ ಕಷ್ಟ !

ಒಂದು ಸಾರಿ ಅವನು ವಲಭೀನಗರಕ್ಕೆ ವ್ಯಾಪಾರ ನಿಮಿತ್ತವಾಗಿ ಹೋಗಬೇಕಾಯಿತು. ಆಗ ಅವಳು ಗಂಡನನ್ನು ಕಂಡು 'ನೀವು ಬರುವತನಕ ನಾನೊಬ್ಬಳೇ ಹೇಗಿರಲಿ? ನೀವಿದ್ದಾಗಲೇ ನಿಮ್ಮ ತಾಯಿ ನನ್ನನ್ನು ಕಾಡಿಸುತ್ತಾರೆ, ನೀವೂ ಇಲ್ಲದೆ ಹೋದರೆ ನನ್ನನ್ನು ಏನು ಮಾಡಿಬಿಡುತ್ತಾರೆಯೋ'! ಎಂದಳು. ಅವನು ಏನು ಮಾಡುವುದಕ್ಕೂ ತೋರದೆ ತಾಯಿಯನ್ನು ಕಂಡು ಭಯಪಡುತ್ತ ಮೆಲ್ಲಗೆ 'ಅಮ್ಮಾ! ಕೀರ್ತಿಸೇನೆಯನ್ನು ನಿನ ಕೈಗೆ ಕೊಟ್ಟಿದ್ದೇನೆ, ಅವಳು ದೊಡ್ಡ ಮನೆತನದವಳು. ಅವಳಲ್ಲಿ ಅಪ್ರೀತಿ ತೋರಿಸಬೇಡ'! ಎಂದು ಕೇಳಿಕೊಂಡನು. ಅವಳು ಕೀರ್ತಿಸೇನೆಯನ್ನು ಕರೆದು ದುರುಗುಟ್ಟಿಕೊಂಡು ನೋಡುತ್ತ ಮಗನೊಡನೆ 'ನಾನೇನೇನು ಮಾಡಿದ್ದೇನೆ ಅವಳನ್ನೇ ಕೇಳಪ್ಪ! ಈ ಮನೆಮುರುಕಿ ನಿನಗೆ ಚುಚ್ಚಿಕೊಟ್ಟಿದ್ದಾಳಲ್ಲ! ನನಗೇನೋ ನೀನು ಬೇರೆ ಅಲ್ಲ, ಅವಳು ಬೇರೆ ಅಲ್ಲ, ಇಬ್ಬರೂ ಸಮನೇ'! ಎಂದಳು. ಈ ಮಾತನ್ನು ಕೇಳಿ ದೇವಸೇನನು ಹೆಂಡತಿಯ ವಿಚಾರದಲ್ಲಿ ನಿಶ್ಚಿಂತನಾಗಿ ಪ್ರಯಾಣ ಮಾಡಿದನು.

ಇತ್ತ ಅವನ ತಾಯಿಯು ಕ್ರಮವಾಗಿ ಸೊಸೆಯ ಪರಿಚಾರಿಕೆಯರನ್ನೆಲ್ಲಾ ಬಿಡಿಸಿದಳು. ಒಂದು ದಿನ ತನ್ನ ಸ್ವಂತ ಸೇವಕಳೊಡನೆ ಮಾತನಾಡಿಕೊಂಡು ಸೊಸೆಯನ್ನು ಜುಟ್ಟು ಹಿಡಿದು ಒಳಕ್ಕೆ ಎಳೆದು ತರಿಸಿ ಪಾಪಿ ಹೆಣ್ಣೆ! ನನ್ನನ್ನೂ ಮಗನನ್ನೂ ಅಗಲಿಸುತ್ತೀಯಾ? ಎಂದು ಹಲ್ಲುಗಳಿಂದ ಕಚ್ಚಿಸಿ ಉಗುರಿನಿಂದ ಪರಚಿಸಿ ನೆಲಮಾಳಿಗೆಯೊಳಗೆ ಕೂಡಿ ಮೇಲೆ ಅಗುಳಿ ಹಾಕಿದಳು. ಪ್ರತಿಸಂಜೆಯೂ ಅದರ ಬಾಗಿಲು ತೆಗೆದು ಒಂದು ಮಣ್ಣಿನ ಪಾತ್ರೆಯಲ್ಲಿ ಅರ್ಧ ಅನ್ನವನ್ನು ಕೊಡಿಸುತ್ತಿದ್ದಳು. ಗಂಡನು ದೂರದೇಶದಲ್ಲಿರುವಾಗ ಅವಳು ಸತ್ತುಹೋದರೆ ಹೋಗಲಿ ಎಂಬುದು ಅವಳ ಯೋಚನೆ.

ಕೀರ್ತಿಸೇನೆಯು ಅತ್ತು ಕರೆದು 'ಗಂಡನು ಐಶ್ವರ್ಯವಂತ, ನನ್ನ ಮನೆತನ ಹಿರಿಯದು, ನಾನೂ ಒಳ್ಳೆಯ ನಡತೆಯಲ್ಲಿದ್ದೇನೆ, ಹೀಗಿದ್ದರೂ ಅತ್ತೆಯ ಹಿಂಸೆಯಿಂದ ನನಗೆ ಈ ದುರ್ಗತಿ ಬಂದಿದೆ. ಹೆಣ್ಣುಮಕ್ಕಳುಬೇಡವೆನ್ನುವುದು ಇದಕ್ಕೆ'! ಎಂದು

ಕೊರಗುತ್ತಿರಲು ಅಕಸ್ಮಾತ್ತಾಗಿ ಅವಳಿಗೆ ಅಲ್ಲಿ ಒಂದು ಸನಿಕೆ ಕಣ್ಣಿಗೆ ಬಿದ್ದಿತು. ದೇವರೇ ಇದನ್ನು ನನಗೆ ತೋರಿಸಿದ್ದಾನೆ ಎಂದುಕೊಂಡು ಅದರಿಂದ ಅಗೆದು ಸುರಂಗ ಮಾಡಿದಳು. ಅದು ದೈವವಶದಿಂದ ತನ್ನ ಕೋಣೆಗೇ ಹೋಯಿತು. ಅಲ್ಲಿ ಅವಳು ಬಟ್ಟೆಬರೆಗಳನ್ನು ತೆಗೆದುಕೊಂಡು ಬೆಳಕುಹರಿಯುವುದಕ್ಕೆ ಮುಂಚೆ ಊರು ಬಿಟ್ಟಳು.

'ಈ ಸ್ಥಿತಿಯಲ್ಲಿ ತವರು ಮನೆಗೆ ಹೋಗುವುದು ಉಚಿತವಲ್ಲ, ಅಲ್ಲಿ ಕೇಳಿದವರಿಗೆ ಏನು ಹೇಳಲಿ? ಜನ ತಾನೇ ನನ್ನನ್ನು ನಂಬುತ್ತಾರೆಯೇ? ಆದ್ದರಿಂದ ಏನಾದರೂ ಉಪಾಯಮಾಡಿ ಗಂಡನಿದ್ದ ಕಡೆಗೇ ಹೋಗಬೇಕು. ಪತಿವ್ರತೆಯರಿಗೆ ಇಹಕ್ಕೂ ಪರಕ್ಕೂ ಗಂಡನೇ ದಿಕ್ಕು! ಎಂದು ಕೊಂಡು ಅವಳು ಒಬ್ಬ ರಾಜಪುತ್ರನ ವೇಷವನ್ನು ಹಾಕಿಕೊಂಡು ಸಮುದ್ರಸೇನನೆಂಬ ವರ್ತಕನೊಡನೆ ವಲಭಿಯ ಕಡೆ ಹೊರಟಳು. ಕಾಡಿನಲ್ಲಿ ಹೋಗುತ್ತಿರುವಾಗ ಒಂದು ರಾತ್ರಿ ಕಳ್ಳರ ಪಡೆ ಅಟ್ಟಿಸಿಕೊಂಡು ಬಂತು. ಆಗ ಅವಳು 'ಈಗ ನಾನು ಕಳ್ಳರ ಕೈಗೆ ಸಿಕ್ಕಿ ಹತಳಾದರೆ ನಿನ್ನ ಹೆಂಡತಿ ಯಾವನನ್ನೋ ಕಟ್ಟಿಕೊಂಡು ಹೋದಳು ಎಂದು ಅತ್ತೆ ಗಂಡನಿಗೆ ಹೇಳುತ್ತಾಳೆ, ಸೆರೆಸಿಕ್ಕಿ ನಾನು ಹೆಂಗಸೆಂದು ಗೊತ್ತಾದರೆ ನನ್ನ ಶೀಲಕ್ಕೆ ಭಂಗ ಬರುತ್ತದೆ, ಆದ್ದರಿಂದ ನಾನು ಈ ವರ್ತಕನ ಚಿಂತೆಬಿಟ್ಟು ನನ್ನನ್ನು ನಾನೇ ಕಾಪಾಡಿಕೊಳ್ಳಬೇಕು' ಎಂದುಕೊಂಡು ಹತ್ತಿರದಲ್ಲಿದ್ದ ಒಂದು ಮರದ ಪೊಟರೆಯಲ್ಲಿ ಅವಿತುಕೊಂಡು ಹುಲ್ಲು ಸೊಪ್ಪುಗಳಿಂದ ತನ್ನನ್ನು ಮುಚ್ಚಿಕೊಂಡಳು. ಕಳ್ಳರು ಸಮುದ್ರ ಸೇನನನ್ನೂ ಅವನ ಅನುಚರರನ್ನೂ ಕೊಂದು ಕೊಳ್ಳೆ ಹೊಡೆದುಕೊಂಡು ಹೋದರು. ಬೆಳಗಾದ ಮೇಲೆ ಅವಳು ಹೊರಕ್ಕೆ ಬಂದಳು. ಪತಿವ್ರತೆಯರನ್ನು ಕಷ್ಟದಲ್ಲಿ ದೇವರೇ ಕಾಪಾಡುತ್ತಾನೆ! ಅದಕ್ಕೋಸ್ಕರವೇ ಅವಳನ್ನು ಒಂದು ಸಿಂಹವು ಕಂಡರೂ ಏನೂ ಮಾಡದೆ ಹೊರಟುಹೋಯಿತು. ಮುಂದೆ ಅಕಸ್ಮಾತ್ ಸಿಕ್ಕಿದ ಒಬ್ಬ ತಾಪಸನು ಅವಳಿಗೆ ತನ್ನ ಕಮಂಡಲುವಿನಿಂದ ಕುಡಿಯುವುದಕ್ಕೆ ನೀರು ಕೊಟ್ಟು ದಾರಿ ತೋರಿಸಿದನು. ಅಂದಿನ ರಾತ್ರಿಯೂ ಅವಳು ಒಂದು ಮರದ ಪೊಟರೆಯಲ್ಲಿ ಅಡಗಿಕೊಂಡಳು.

ಅಲ್ಲಿಗೆ ಒಬ್ಬ ರಾಕ್ಷಸಿಯೂ ಅವಳ ಮಕ್ಕಳೂ ಬಂದು ಮರ ಹತ್ತಿ ಕುಳಿತರು. ಮಕ್ಕಳು 'ಅಮ್ಮ! ಏನಾದರೂ ತಿಂಡಿ ಕೊಡಮ್ಮ'! ಎಂದು ಕಾಡಿಸಲು, ತಾಯಿಯು 'ಇವೊತ್ತು ಹಿರಿಯ ಸುಡುಗಾಡಿಗೆ ಹೋದರೂ ಏನೂ ಸಿಕ್ಕಲಿಲ್ಲ, ಡಾಕಿನಿಯರನ್ನು ಏನಾದರೂ ಕೊಡಿ ಎಂದು ಕೇಳಿದೆ, ಅವರು ಕೊಡಲಿಲ್ಲ, ಆಮೇಲೆ ಭೈರವನನ್ನು ಪ್ರಾರ್ಥಿಸಿದೆ. ಅವನು 'ಇಲ್ಲಿಗೆ ಹತ್ತಿರದಲ್ಲಿರುವ ವಸುದತ್ತಪುರಕ್ಕೆ ಹೋಗು, ಅಲ್ಲಿ ವಸುದತ್ತನೆಂಬ ರಾಜನಿದ್ದಾನೆ, ಅವನು ಬೇಟೆ ಮಾಡಿ ಮಲಗಿದ್ದಾಗ ಒಂದು ಜರಿಯು ಅವನ ಕಿವಿಹೊಕ್ಕಿತು, ಅದು ಕಾಲಕ್ರಮದಲ್ಲಿ ತಲೆಯ ತುಂಬ ಮರಿಹಾಕಿತು, ಅದರಿಂದ ಅವನು ಏನೂ ತೋರದವನಾಗಿದ್ದಾನೆ, ವೈದ್ಯರಿಗೆ ಈ ರೋಗವೇನೆಂದು ಗೊತ್ತಾಗಿಲ್ಲ. ಅವನು ಇನ್ನು ಕೆಲವೇ ದಿವಸಗಳಲ್ಲಿ ಸತ್ತುಹೋಗುತ್ತಾನೆ, ಅವನ ಮಾಂಸವನ್ನು ತಿನ್ನಿ, ಅದು ಆರು ತಿಂಗಳಾಗುತ್ತದೆ'! ಎಂದು ಹೇಳಿದನು. ನಾನೇನು ಮಾಡಲಪ್ಪ'! ಎಂದಳು. ಮಕ್ಕಳು 'ಇದು ಇಂಥ ರೋಗ ಎಂದು ಗೊತ್ತಾದರೆ ಆ ರಾಜ ಬದುಕಿಕೊಳ್ಳುತ್ತಾನೇನಮ್ಮ? ಆ ರೋಗ ವಾಸಿಯಾಗುವುದು ಹೇಗೆ'? ಎಂದು ಕೇಳಿದವು. ಅವಳು 'ಈ ರೋಗ ವಾಸಿಯಾಗ ಬೇಕಾದರೆ, ಮೊದಲು ಅವನ ತಲೆಗೆ ತುಪ್ಪ ತಿಕ್ಕಿ ಮಧ್ಯಾಹ್ನದ ಉರಿಬಿಸಿಲಿನಲ್ಲಿ ಕೂರಿಸಬೇಕು, ಅವನ ಕಿವಿಗೆ ಒಂದು ಬಿದಿರು ಕೊಳವೆಯನ್ನು ಸಿಕ್ಕಿಸಿ ಅದನ್ನು ಒಂದು

ತಣ್ಣೀರಿನ ಗಡಿಗೆಗೆ ಬಿಡಬೇಕು. ಆಗ ಬಿಸಿಲಿನ ತಾಪವನ್ನು ತಾಳಲಾರದೆ ಜರಿಗಳು ತಲೆಬಿಟ್ಟು ಹೊರಟು ಕಿವಿಯ ಮೂಲಕ ಬಿದಿರು ಕೊಳವೆಗೆ ಬಂದು, ತಂಪಾಗುವುದೆಂದು ಗಡಿಗೆಗೆ ಬೀಳುತ್ತವೆ. ಆಮೇಲೆ ರೋಗ ವಾಸಿಯಾಗುತ್ತದೆ' ಎಂದಳು.

ಕೀರ್ತಿಸೇನೆಯು ಇದನ್ನೆಲ್ಲಾ ಕೇಳಿಕೊಂಡಿದ್ದು, ಬೆಳಗ್ಗೆ ಹೊರಟು ವಸುದತ್ತಪುರಕ್ಕೆ ಹೋಗಿ ಒಬ್ಬ ದನಕಾಯುವವನನ್ನು ಜೊತೆಮಾಡಿಕೊಂಡು ಅವನಿಂದ ದ್ವಾರಪಾಲಕನಿಗೆ ಹೇಳಿಸಿದಳು. ರಾಜನು 'ಈ ರೋಗವನ್ನು ವಾಸಿಮಾಡಿದರೆ ಅರ್ಧರಾಜ್ಯವನ್ನು ಕೊಡುತ್ತೇನೆ, ನಿನ್ನೆದಿನ ರಾತ್ರಿ ಯಾರೋ ಒಬ್ಬ ಹೆಂಗಸು ಬಂದು ನನ್ನ ಬೆನ್ನ ಮೇಲಿಂದ ಒಂದು ಕರಿಯ ಕಂಬಳಿಯನ್ನು ಎಳೆದು ಹಾಕಿದ ಹಾಗೆ ಕನಸುಕಂಡೆ. ಆದ್ದರಿಂದ ನೀನು ವಾಸಿಮಾಡುತ್ತೀಯೆ ಎಂದು ನನಗೆ ಭರವಸೆ ಇದೆ'! ಎಂದನು. ಅವಳು. 'ಇಂದು ಹೊತ್ತಾಯಿತು, ನಾಳೆ ಚಿಕಿತ್ಸೆ ಮಾಡುತ್ತೇನೆ'! ಎಂದು ಹೇಳಿ ಮೊದಲು ತಲೆಗೆ ಹಸಿವಿನ ತುಪ್ಪವನ್ನು ತಿಕ್ಕಿದಳು. ಅದರಿಂದ ಅವನಿಗೆ ನಿದ್ರೆಬಂತು, ಯಾತನೆ ಹೋಯಿತು, ದೇವರೇ ಈ ವೈದ್ಯನ ರೂಪದಲ್ಲಿ ಬಂದನೆಂದು ಅಲ್ಲಿದ್ದವರೆಲ್ಲರೂ ಅವಳನ್ನು ಹೊಗಳಿದರು. ಮರುದಿನ ಮಧ್ಯಾಹ್ನ ಮಂತ್ರಿಗಳೂ ಅಂತಃಪುರದವರೂ ನೋಡುತ್ತಿರುವ ಹಾಗೆಯೇ ಅವಳು ರಾಕ್ಷಸಿ ಹೇಳಿದ ಕ್ರಮದಲ್ಲಿ ರಾಜನ ಕಿವಿಯಿಂದ ಐವತ್ತು ಜರಿಗಳನ್ನು ತೆಗೆದಳು. ಆಮೇಲೆ ಹಾಲು ತುಪ್ಪಗಳನ್ನು ಮೈಗೆ ಉಜ್ಜಿಸಿ ಸ್ನಾನ ಮಾಡಿಸಿದಳು. ಅವನು ತನ್ನ ತಲೆಯಿಂದ ಬಂದ ಅಷ್ಟೊಂದು ಜರಿಗಳನ್ನು ನೋಡಿ ತನಗೆ ಪುನರ್ಜನ್ಮವಾಯಿತೆಂದುಕೊಂಡನು.

ಅರ್ಧರಾಜ್ಯ ಬೇಡವೆನ್ನಲು ಅವಳಿಗೆ ಆನೆ ಕುದುರೆ ಹೊನ್ನು ವಸ್ತ್ರ ಮುಂತಾದವುಗಳನ್ನು ಯಥೇಚ್ಛವಾಗಿ ಕೊಟ್ಟು ರಾಜನು ಅವಳನ್ನು ಗೌರವಿಸಿದನು. ಅವಳು ಅವೆಲ್ಲವನ್ನೂ ಅವನ ಹತ್ತಿರವೇ ಬಿಟ್ಟು ಸ್ವಲ್ಪ ದಿನ ತಾನು ವ್ರತದಲ್ಲಿರುವಂತೆ ಹೇಳಿದಳು. ಕೆಲವು ದಿನಗಳ ಮೇಲೆ ವಲಭಿಯಿಂದ ವರ್ತಕರ ಪಡೆಯೊಂದು ಬಂದಿತೆಂದು ಕೇಳಿ ಹೋಗಿ ನೋಡಲು ಅದರಲ್ಲಿ ತನ್ನ ಗಂಡನಿದ್ದನು. ಅವಳು ಕಣ್ಣೀರು ಹಾಕುತ್ತ ಅವನಿಗೆ ನಮಸ್ಕರಿಸಿದಳು. ಅವನು ಅವಳ ಗುರುತು ಹಿಡಿದನು. ವರ್ತಕರೆಲ್ಲರಿಗೂ ಆಶ್ಚರ್ಯವಾಯಿತು. ಅದನ್ನು ಕೇಳಿ ರಾಜನೂ ಅಲ್ಲಿಗೆ ಬಂದನು. ದೇವಸೇನನು ತನ್ನ ತಾಯಿಯ ಚರ್ಯೆಯನ್ನೂ ಹೆಂಡತಿಯ ಕಾರ್ಯವನ್ನೂ ಕೇಳಿ ಕೋಪ ಕ್ಷಮೆ ಆಶ್ಚರ್ಯ ಹರ್ಷಗಳಲ್ಲಿ ಮುಳುಗಿ ಹೋದನು. ಕೀರ್ತಿಸೇನೆಯ ಕೋರಿಕೆಯಂತೆ ರಾಜನು ತಾನು ಕೊಟ್ಟಿದ್ದ ಗ್ರಾಮ ಆನೆ ಕುದುರೆ ಮೊದಲಾದವುಗಳನ್ನೆಲ್ಲಾ ಅವಳ ಗಂಡನಿಗೆ ಒಪ್ಪಿಸಿದನು. ಅವನು ಅವುಗಳನ್ನೂ ತಾನು ವ್ಯಾಪಾರದಲ್ಲಿ ಸಂಪಾದಿಸಿದ ಧನವನ್ನೂ ಇಟ್ಟುಕೊಂಡು ತಾಯಿಯನ್ನು ತೊರೆದು ಆ ಊರಿನಲ್ಲಿಯೇ ಹೆಂಡತಿಯೊಡನೆ ಸುಖವಾಗಿದ್ದು ಬಿಟ್ಟನು.

ಹೀಗೆ ಎಷ್ಟೋ ಹೆಂಗಸರಿಗೆ ಅತ್ತೆ ಅತ್ತಿಗೆಯರ ಕಾಟವಿರುತ್ತದೆ. ಅಂಥ ಅತ್ತೆ ಅತ್ತಿಗೆಯರಿಲ್ಲದ ಮನೆಯನ್ನು ನೀನು ಸೇರುವಂತಾಗಲೆಂದು ನಾನು ಪ್ರಾರ್ಥಿಸುತ್ತೇನೆ ಎಂದಳು. ಸಂಜೆಯಾಗುತ್ತ ಬರಲು ಸೋಮಪ್ರಭೆಯು ಕಳಿಂಗಸೇನೆಗೆ ಹೇಳಿ ತನ್ನ ಮನೆಗೆ ಹೋದಳು.

**बृहत्कथामञ्जरी।** **मदनमञ्चुके - कीर्तिसेनाख्यायिका।**

अन्तःपुरगता तत्र कदाचिदशृणोद्वचः।
**सोमप्रभाया** विश्रम्भकथासु मृगलोचना॥ 216

सखि मन्ये यदा कश्चिद्वरस्त्वां परिणेष्यति।
तदा नौ सहवासोऽयं ध्रुवं दूरीभविष्यति॥ 217

प्रवेक्ष्यामि कथं स्वैरं सखि भर्तृगृहं तव।
**जामिश्वश्रूजनायत्तं विषमं भर्तृमन्दिरम्॥** 218

**इति स्वयंप्रभासमागमः।** 10

शृणु श्वश्रुकृतैर्दुःखैर्यथाप्ता **कीर्तिसेन**या।
विपत्स्वबुद्ध्या च यथा निस्तीर्णा व्यसनोदधिम्॥ 219

**धनपालित** इत्यासीद्वणिक्**पाटलिपुत्रके**।
कीर्तिसेनाभवत्तस्य कन्या लावण्यवाहिनी॥ 220

तां यौवनवतीं काले स सारङ्गविलोचनाम्।
**देवसेनाय** वणिजे **मगधावासिने** ददौ॥ 221

सा भर्त्रा लालिता स्वैरं श्वश्र्वा कलहपीडिता।
उवास गेहे श्रीखण्डवने सर्पाकुले यथा॥ 222

ततः कदाचिद्**वलभीं** प्रस्थितो द्रविणार्जने।
देवसेनः प्रियावेश्म विवेशामन्त्रणोद्यतः॥ 223

तमब्रवीत्कीर्तिसेना त्वयि याते ध्रुवं विभो।
भर्त्सयिष्यति मां श्वश्रूः कलहेन निरन्तरम्॥ 224

इति प्रियावचः श्रुत्वा संस्तभ्य विरहव्यथाम्।
ययौ मातरमाभाष्य वर्तयेथाः स्नुषामिति॥ 225

तस्मिन्गते तज्जननी सततं क्रोधमूर्छिता।
वियोगदुःखितां प्राह कीर्तिसेनां नताननाम्॥ 226

थूत्कृते नित्यरुदिते दुर्भगे मङ्गलोज्झिते।
बाष्पं ते पितुरेवास्तु पुत्रो जीवतु मे चिरम्॥ 227

उक्त्वेति तत्परिजनं निरस्य सहसा गृहम्।
भयात्प्रसन्नवदनां पुनराह परेऽहनि॥ 228

हासशीले तव पतिर्भयाद्देशान्तरं गतः।
त्व नु वेश्येव निःस्नेहा विलासेनेक्षसे जनम्॥ 229

इति नानाविधोद्वेगैः सावेगक्रोधदुःसहैः।
वाक्सायकैस्तामसकृज्जघान विरहेऽपि सा॥ 230

संमन्त्र्य तद्वधोपायं तामथान्धगृहोदरे।
रक्षेह भर्तृद्रविणं स्वमित्युक्त्वा न्यवेशयत्॥ 231

श्वश्वा च पिहिते तत्र न्यस्तं सा निबिडार्गले।
सदाऽशनचतुर्भागं लेभे भग्नशरावके॥ 232

शरावकर्परेणाथ सा चखान गृहं शनैः।
दैवात्प्राप्तेन च पुनः खनित्रेण महाबिलम्॥ 233

तेनैव निशि निर्गम्य गृहीतकनकाम्बरा।
विधाय पौरुषं वेषं बलभीप्रमुखं ययौ॥ 234

पथि सार्थपतिं प्राप्य कृतराजसुताकृतिः।
प्रययौ पुरुषस्पर्शपरिहारपरैव सा॥ 235

ततस्तस्मिन्महासार्थे पापाताशनिवन्निशि।
चौरसेना **विधौ वामे त्रुट्यन्त्यालम्बनान्यपि** ॥ 236

सा चौरभयवित्रस्ता सार्थे निःशेषतां गते।
उवास गूढां रजनीं तृणे भूकुहरान्तरे॥ 237

प्रातस्ततो विनिर्गत्य प्रविष्टा विकटाटवीम्।
सिंहव्यालैर्न निहता **सतीतेजोऽतिदुःसहम्** ॥ 238

राजपुत्राकृतिं दृष्ट्वा तामथ श्रमतापिताम्।
कारुण्यात्सलिलैः शीतैर्वितृष्णामकरोन्मुनिः॥ 239

तिरोहिते मुनिसुते निशीथे प्रत्युपस्थिते।
सा तस्थौ दस्युचकिता सुषिरद्रुमकोटरे॥ 240

ततोऽर्धरात्रे संप्राप्ते राक्षसीं सह पुत्रकैः।
छायामिव कृतान्तस्य ददर्शालक्षिता पुरः॥ 241

भोजनं याच्यमानासौ तनयांस्तानभाषत।
महाकालेन निर्दिष्टं भोजनं नो भविष्यति॥ 242

**वसुदत्ताभिधो** राजा **वसुदत्तपुराधिपः**।
शतपद्या समाक्रान्तः कर्णरन्ध्रप्रविष्टया॥ 243

तत्प्रसूतैः शतपदीशतैर्व्याप्तशिरोन्तरः।
अविज्ञातामयो वैद्यैर्भविता पूर्णभोजनम्॥ 244

श्रुत्वेति कौतुकाविष्टैः सा पृष्टा राक्षसैः सुतैः।
नृपस्य जीवितोपायं वीतशङ्कमभाषत॥ 245

घृताभ्यक्तः स मध्याह्नतापे संतप्तपायसैः।
उपलिप्तं शिरः कृत्वा श्रवणे वेणुनालिकाम्॥ 246

स्थापयेन्नालिकाप्रान्ते कुम्भं यदि सुशीतलम्।
ततोऽस्मिन्निःसरन्त्येव शतपद्यो न संशयः॥ 247

किमनेनाथवास्माकं यातु राजा स पञ्चताम्।
अस्मत्संतृप्तये तूर्णमित्युक्त्वा राक्षसी ययौ॥ 248

कीर्तिसेना निशम्यैवं प्रातस्तं प्रययौ नृपम्।
अदूरवासिनं क्षिप्रं वैद्यवेषोपलक्षिता॥ 249

पूर्णेन्दुसुन्दरमुखः श्रीमानेक इवाश्विनोः।
सुकुमारारविन्दाक्षो वैद्यो देशान्तरागतः॥ 250

नृपं स्वस्थं विधास्यामि द्वारपं प्रति दर्शयन्।
प्रविष्ट इति राजानं प्रतीहारो व्यजिज्ञपत्॥ 251

ततः क्षिप्रं समाहूय राज्ञा देव्या च पूजिता।
वैद्यवेषाविशत्क्षिप्रं कीर्तिसेना नृपालयम्॥ 252

ददर्श नृपतिं तत्र क्षयक्षीणमिवोडुपम्।
शोषितं घूणसंघेन छायावृक्षमिवाततम्॥ 253

देवीकरतलन्यस्तकपालो वीक्ष्य तं नृपः।
निभृतोऽभूच्छुभप्राप्तौ मनः पूर्वं प्रसीदति ॥ 254

ततो यथोक्तं राक्षस्या सा विधाय महीपतेः।
चकर्ष शिरसो व्याधिं येन स्वस्थोऽभवत्क्षणात् ॥ 255

व्याधिमुक्तोऽथ नृपतिर्वैद्यवेषामुवाच ताम्।
राज्यं ममाश्वरत्नाढ्यं गृहाणेति प्रसन्नधीः ॥ 256

साब्रवीन्न्यासभूतं मे संप्रति त्वयि तिष्ठतु।
याचितो दास्यसीत्युक्त्वा गूढा तस्थौ तदालये ॥ 257

ततः कालेन स वणिग्देवसेनः समाययौ।
महाभाण्डधनाभोगपूरिताशेषपत्तनः ॥ 258

राज्ञा निवारितं गन्तुं शुल्कायतमुपेत्य सा।
चिरसंगमपीयूषप्लाव्यमानाभवन्मुहुः ॥ 259

देवसेनः स विज्ञाय कीर्तिसेनां सकौतुकः।
दृष्ट्वा निशम्य वृत्तान्तं बभूव प्रमदाकुलः ॥ 260

भूपालोऽपि तदाश्चर्यं विदित्वा निखिलं ततः।
उवाच धर्मभगिनी ममेयं त्वं स्वसुः पतिः ॥ 261

वैद्यवेषं विधायैषा जीवितं विततार मे।
इत्युक्त्वा वणिजे राजा राज्यार्धं मुदितो ददौ ॥ 262

इति श्वश्र्वा सुविपुले पातिता शोकसागरे।
कीर्तिसेना स्वधैर्येण तारिता प्राप वल्लभम् ॥ 263

**इति कीर्तिसेनाख्यायिका 11**

**कलिङ्गसेनतनया** निशम्येति सखीवचः।
सतीचरितमाश्चर्यम् प्रदध्यौ मनसा सती ॥ 26

**इति श्रीव्यासदासापराभिधानस्य काश्मीरकमहाकवेः क्षेमेन्द्रस्य बृहत्कथामञ्जर्यां कीर्तिसेनाख्यायिका भागः ॥**

## **कथासरित्सागरः। मदनमञ्चुकालम्बकः 6**

### आदितस्तरङ्गः 29। तृतीयस्तरङ्गः

ततः **सोमप्रभा** प्रातस्तद्विनोदोपपादिनीम्।
न्यस्तदारुमयानेकमायासद्यन्त्रपुत्रिकाम्॥ 1

करण्डिकां समादाय सा नभस्तलचारिणी।
तस्याः **कलिङ्गसेनाया** निकटं पुनरराययौ॥ 2

ततः स्वोचितमाहारं दातुं विज्ञाप्य तं नृपम्।
प्राप्यानुज्ञां विमाने तां सानुगां यन्त्रनिर्मिते॥ 49

कलिङ्गसेनामादाय प्रतस्थे गगनेन सा।
सोमप्रभा पितृगृहं ज्येष्ठायाः स्वसुरन्तिकम्॥ 50

क्षणाच्च प्राप्य **विन्ध्याद्रिवर्ति** तत्पितृमन्दिरम्।
तस्याः **स्वयंप्रभायाश्च** पार्श्वं तामनयत्स्वसुः॥ 51

तत्रापश्यज्जटाजूटमालिनीं तां **स्वयंप्रभाम्**।
कलिङ्गसेना लम्बाक्षमालां सा ब्रह्मचारिणीम्॥ 52

सुसिताम्बरसंवीतां हसन्तीमिव पार्वतीम्।
कामभोगमहाभोगगृहीतोग्रतपःक्रियाम्॥ 53

सापि सोमप्रभाख्यातां प्रणतां तां नृपात्मजाम्।
स्वयंप्रभा कृतातिथ्या संविभेजे फलाशनैः॥ 54

सखि भुक्तैः फलैरेतैर्जरा ते न भविष्यति।
विनाशिन्यस्य रूपस्य पद्मस्येव हिमाहतिः॥ 55

एतदर्थमिह स्नेहादानीता भवती मया।
इति सोमप्रभा चैतां राजपुत्रीमभाषत॥ 56

ततः कलिङ्गसेनात्र तान्यभुङ्क्त फलानि सा।
सद्योऽमृतरसासारसिक्ताङ्गीव बभूव च॥ 57

ददर्श च पुरोद्यानं भ्रमन्ती तत्र कौतुकात्।
ससुवर्णाब्जवापीकं सुधास्वादुफलद्रुमम्॥ 58

हेमचित्रखगाकीर्णं सन्मणिस्तम्भविभ्रमम्।
भित्तिबुद्धिकरं शून्ये भित्तौ शून्यप्रतीतिदम्॥ 59

जले स्थलधियं कुर्वत्स्थले च जलबुद्धिकृत्।
लोकान्तरमिवापूर्वं **मयमायाविनिर्मितम्**॥ 60

प्रविष्टपूर्वं प्लवगैः पुरा सीतागवेषिभिः।
स्वयंप्रभाप्रसादेन चिरात्संप्राप्तनिर्गमैः॥ 61

ततस्तदद्भुतपुरप्रकामालोकविस्मिताम्।
अजराभाजनीभूतां तामापृष्ट स्वयंप्रभाम्॥ 62

कलिङ्गसेनामारोप्य यन्त्रे भूयो विहायसा।
सोमप्रभा **तक्षशिला**मानिनाय स्वमन्दिरम्॥ 63

तत्र सा तद्यथावस्तु पित्रोः सर्वमवर्णयत्।
कलिङ्गसेना तौ चापि परं संतोषमीयतुः॥ 64

0 0 0 0 0 0

इत्थं तयोर्द्वयोः सख्योर्गच्छत्सु दिवसेष्वथ।
ऊचे कलिङ्गसेनां तामेवं सोमप्रभैकदा॥ 65

यावन्न परिणीता त्वं तावत्सख्यं मम त्वया।
त्वद्भर्तृभवने पश्चान्मम स्यादागमः कुतः॥ 66

**न दृश्यो हि सखीभर्ता नाङ्गीकार्यः कथंचन।**
**अवेर्वृकीव स्नुषायाः श्वश्रूर्मांसानि खादति**॥ 67

तथा च शृणु वच्म्येतां **कीर्तिसेना**कथां तव।
धैर्यं सत्त्वं च कल्याणं भर्तृलाभोऽपि यत्फलम्॥ 68

पुरे **पाटलिपुत्राख्ये** धुर्यो धनवतां वणिक्।
नाम्ना यथार्थेन पुरा **धनपालित** इत्यभूत्॥ 69

**कीर्तिसेनाभिधाना** च तस्याजायत कन्यका।
रूपेणानन्यसदृशी प्राणेभ्योऽप्यधिकप्रिया॥ 70

सा च तेन समानीय **मगधेषु** महर्द्धये।
**देवसेनाभिधानाय** दत्ताभूद्वणिजे सुता॥ 71

तस्य चातिसुवृत्तस्य देवसेनस्य दुर्जनी।
विपन्नजनकस्यासीज्जननी स्वामिनी गृहे॥ 27

सा स्नुषां कीर्तिसेनां तां पश्यन्ती पतिसंमताम्।
क्रुधा ज्वलन्ती पुत्रस्य परोक्षमकदर्थयत्॥ 73

कीर्तिसेना च सा पत्युर्वक्तुं नैव शशाक तत्।
**कष्टा हि कुटिलश्वश्रूपरतन्त्रवधूस्थितिः**॥ 74

एकदा स पतिस्तस्या देवसेनो वणिज्यया।
गन्तुं प्रववृते बन्धुप्रेरितो **वलभीं** पुरीम्॥ 75

ततः सा कीर्तिसेना तं पतिमेवभाषत।
इयच्चिरं मया नैतदार्यपुत्र तवोदितम्॥ 76

कदर्थयति मामेषा तवाम्बा त्वय्यपि स्थिते।
त्वयि तु प्रोषिते किं मे कुर्यादिति न वेद्म्यहम्॥ 77

तच्छ्रुत्वा स समुद्भ्रान्तस्तत्स्नेहात्सभयः शनैः।
देवसेनस्तदा गत्वा मातरं प्रणतोऽब्रवीत्॥ 78

कीर्तिसेनाधुना हस्ते तवाम्ब प्रस्थितस्य मे।
नास्या निःस्नेहता कार्या कुलीनतनया ह्यसौ॥ 79

तच्छ्रुत्वा कीर्तिसेनां तामाहूयोद्वर्तितेक्षणा।
तं देवसेनं माता सा तत्कालं समभाषत॥ 80

कृतं मया किं पृच्छैतामेवं त्वां प्रेरयत्यसौ।
गृहभेदकरी पुत्र मम तु द्वौ युवां समौ॥ 81

श्रुत्वैतच्छान्तचित्तोऽभूत्तत्कृते स वणिग्वरः।
**व्याजसप्रणयैर्वाक्यैर्जनन्या यो न वञ्च्यते ॥** 82

कीर्तिसेना तु सा तूष्णीमासीदुद्वेगसस्मिता।
देवसेनस्तु सोऽन्येद्युः प्रतस्थे वलभीं वणिक् ॥ 83

ततस्तद्विरहक्लेशजुषस्तस्याः क्रमेण सा।
तन्माता कीर्तिसेनाया दासीः पार्श्वान्न्यवारयत् ॥ 86

कृत्वा च गृहचारिण्या स्वचेट्या सह संविदम्।
आनाय्याभ्यन्तरं गुप्तं तां विवस्त्रां चकार सा ॥ 85

पापे हरसि मे पुत्रमित्युक्त्वा सकचग्रहम्।
पादैर्दन्तैर्नखैश्चैतां चेट्या सममपाटयत् ॥ 86

चिक्षेप चैनां भूगेहे सपिधाने दृढार्गले।
तत्रत्येऽभ्युद्धृताशेषपूर्वजातार्थसंचये ॥ 87

न्यधाच्च तस्यास्तत्रान्तः प्रत्यहं सा दिनात्यये।
पापा तादृगवस्थाया भक्तस्यार्धशरावकम् ॥ 88

अचिन्तयच्च दूरस्थे पत्यावेवं मृता स्वयम्।
इमां व्युत्थाप्य यातेति वक्ष्यामि दिवसैरिति ॥ 89

इत्थं भूमिगृहे क्षिप्ता श्वश्र्वा पापकृता तया।
सुखार्हा रुदती तत्र कीर्तिसेना व्यचिन्तयत् ॥ 90

**आढ्यः पतिः कुले जन्म सौभाग्यं साधुवृत्तता।**
**तदप्यहो मम श्वश्रूप्रसादादीदृशी विपत् ॥** 91

**एतदर्थं च निन्दन्ति कन्यानां जन्म बान्धवाः।**
**श्वश्रूननन्दृसंत्रासमसौभाग्यादिदूषितम् ॥** 92

इति शोचन्त्यकस्मात्सा कीर्तिसेना खनित्रकम्।
लेभेऽस्माद्भूगृहाद्धात्रा मनःशल्यमिवोद्धृतम् ॥ 93

अयोमयेन तेनात्र सुरुङ्गां निचखान सा।
तावद्यावत्तयोत्तस्थे दैवात्स्वाद्वासवेश्मनः॥ 94

ददर्श च प्रदीपेन प्राक्तनेनाथ तद्गृहम्।
अक्षीणेन कृतालोका धर्मेणेव निजेन सा॥ 95

आदायातश्च वस्त्राणि स्वं स्वर्णं च निशाक्षये।
निर्गत्यैव ततो गुप्तं जगाम नगराद्बहिः॥ 96

एवंविधाया गन्तुं मे न युक्तं पितृवेश्मनि।
किं वक्ष्ये तत्र लोकश्च प्रत्येष्यति कथं मम॥ 97

अतः स्वयुक्त्या गन्तव्यं पत्युरेवान्तिकं मया।
**इहामुत्र च साध्वीनां पतिरेका गतिर्यतः**॥ 98

इत्यालोच्य चकारात्र तडागाम्बुकृताप्लवा।
राजपुत्रस्य वेषं सा कीर्तिसेना सुबृंहितम्॥ 99

ततो गत्वाऽऽपणे दत्त्वा किंचिन्मूल्येन काञ्चनम्।
कस्यापि वणिजो गेहे दिने तस्मिन्नुवास सा॥ 100

अन्येद्युस्तत्र चक्रे च **वलभीं** गन्तुमिच्छता।
**समुद्रसेन**नाम्ना सा वणिजा सह संस्तवम्॥ 101

तेन साकं सभृत्येन प्राप्तुं प्राक्प्रस्थितं पतिम्।
सद्राजपुत्रवेषा सा प्रतस्थे वलभीं प्रति॥ 102

जगाद तं च वणिजं गोत्रजैरस्मि बाधितः।
तत्त्वया सह गच्छामि वलभीं स्वजनान्तिकम्॥ 103

तच्छ्रुत्वा स वणिक्पुत्रो मार्गे पर्यचरच्च ताम्।
राजपुत्रो ध्रुवं भव्यः कोऽप्यसाविति गौरवात्॥ 104

ययौ च स वणिक्सार्थः पुरस्कृत्याटवीपथम्।
बहुशुल्कभयत्यक्तमार्गान्तरजनाश्रितम्॥ 105

दिनैः प्राप्याटवीद्वारं सायं सार्थे कृतस्थितौ।
चक्रे कृतान्तदूतीव शब्दं भयकरं शिवा ॥ 106

तदभिज्ञे वणिग्लोके चौराद्यापातशङ्किनि।
हस्ते गृहीतशस्त्रेषु सर्वतो रिपुरक्षिषु ॥ 107

ध्वान्ते धावति दस्यूनामग्रयायिबलोपमे।
कीर्तिसेना तदालोक्य पुंवेषा सा व्यचिन्तयत् ॥ 108

अहो दुष्कृतिनां कर्म संतानेनैव वर्धते।
पश्य श्वश्रूकृता व्यापदिहापि फलिता मम ॥ 109

प्रथमं मृत्युनेवाहं श्वश्रूकोपेन भक्षिता।
प्रविष्टा भूगृहं पश्चाद्गर्भवासमिवापरम् ॥ 110

देवात्ततोऽपि निष्क्रान्ता जातेव पुनरप्यहम्।
इहाद्यागत्य संप्राप्ता भूयो जीवितसंशयम् ॥ 111

चौरैर्यदि हतास्मीह तच्छ्वश्रूर्मम वैरिणी।
अन्यासक्ता गता क्वापीत्यभिधास्यति मे पतिम् ॥ 112

स्त्रीति ज्ञातास्मि केनापि हृतवस्त्रान्तरा यदि।
ततो मृत्युर्मम श्रेयान्न पुनः शीलविप्लवः ॥ 113

तेन चात्मैव मे रक्ष्यो नापेक्ष्योऽयं सुहृद्वणिक्।
सतीधर्मो हि सुस्त्रीणां चिन्त्यो न सुहृदादयः ॥ 114

इति निश्चित्य सा प्राप चिन्वती तरुमध्यगम्।
गर्तं गृहाकृतिं दत्तं कृपयेवान्तरं भुवा ॥ 115

तत्र प्रविश्य चाच्छाद्य तृणपर्णादिभिस्तनुम्।
तस्थौ संधार्यमाणा सा पतिसंगमवाञ्छया ॥ 116

ततो निशीथे सहसा निपत्यैवोद्यतायुधा।
चौरसेना सुमहती सार्थं वेष्टयति स्म तम् ॥ 117

निनदद्दस्युकालाभ्रं शस्त्रज्वालाचिरप्रभम्।
ततः सरुधिरासारं तत्राभूद्युद्धदुर्दिनम्॥ 118

हत्वा समुद्रसेनं च सानुगं तं वणिक्पतिम्।
बलिनोऽथ ययुश्चौरा गृहीतधनसंचयाः॥ 119

तदा च कीर्तिसेना सा श्रुतकोलाहला बलात्।
यन्न मुक्तासुभिस्तत्र **कारणं केवलो विधिः** ॥ 120

ततो निशायां यातायामुदिते तिग्मतेजसि।
निर्जगाम च सा तस्माद्गर्ताद्विटपमध्यतः॥ 121

**कामं भर्त्रेकभक्तानामविस्खलिततेजसाम्।**
**देवता एव साध्वीनां त्राणमापदि कुर्वते** ॥ 122

यत्तत्र निर्जनेऽरण्ये सिंहो दृष्ट्वापि तां जहौ।
न परं यावदभ्येत्य कुतश्चित्कोऽपि **तापसः** ॥ 123

पृष्टोदन्तां समाश्वास्य जलपानं कमण्डलोः।
दत्त्वोपदिश्य पन्थानं तस्याः क्वापि तिरोदधे॥ 124

ततस्तृप्तामृतेनेव क्षुत्पिपासाविनाकृता।
तापसोक्तेन मार्गेण प्रतस्थे सा पतिव्रता॥ 125

अथास्तशिखरारूढं प्रसारितकरं रविम्।
रात्रिमेकां क्षमस्वेति वदन्तमिव वीक्ष्य सा॥ 126

महतोऽरण्यवृक्षस्य गृहाभं मूलकोटरम्।
विवेश पिदधे चास्य द्वारमन्येन दारुणा॥ 127

प्रदोषे च ददर्शात्र द्वारच्छिद्रान्तरेण सा।
**राक्षसी**मागतां घोरां बालकैरन्वितां सुतैः॥ 128

तीर्णान्यविपदद्याहमनया भक्षितेति सा।
त्रस्ता यावत्तरौ तावदारूढा तत्र राक्षसी॥ 129

अन्वारूढाश्च तत्पुत्रास्तत्र तां किल राक्षसीम्।
अब्रुवन्नम्ब नः किंचिद्भक्ष्यं देहीति तत्क्षणम्॥ 130

ततः सा राक्षसी बालांस्तानुवाचाद्य पुत्रकाः।
महाश्मशानं गत्वापि भक्ष्यं नासादितं मया॥ 131

याचितो **डाकिनीसंघो**ऽप्यत्र भागमदान्न मे।
तत्खेदादथ विज्ञाप्य याचितो **भैरवो** मया॥ 132

स च नामान्वयौ पृष्ट्वा देवो मामेवमादिशत्।
**भयंकरि** कुलीनासि **खरदूषणवंशजा**॥ 133

तदितो नातिदूरस्थं **वसुदत्तपुरं** व्रज।
तत्रास्ते **वसुदत्ताख्यो** राजा धर्मपरो महान्॥ 134

यः कृत्स्नामटवीमेतां पर्यन्तस्थोऽभिरक्षति।
स्वयं गृण्हाति शुल्कं च निगृण्हाति च तस्करान्॥ 135

तस्याटव्यां च मृगयाश्रमसुप्तस्य भूपतेः।
अज्ञातैव प्रविष्टान्तः कर्णे **शतपदी** लघु॥ 136

सा च कालेन बहुशः प्रसूताऽस्य शिरोन्तरे।
तेन रोगेण राजासौ स्नायुशोफोऽद्य वर्तते॥ 137

वैद्याश्चास्य न तं व्याधिं विदन्त्यन्योऽपि कोऽपि चेत्।
न ज्ञास्यति ततश्चैष दिनैरल्पैर्विपत्स्यते॥ 138

तस्य मांसानि भुञ्जीथा विपन्नस्य स्वमायया।
भक्षितैस्तैर्हि षण्मासान्परितृप्ता भविष्यसि॥ 139

इत्थं मे भैरवेणापि संविभागः ससंशयः।
कालवांश्चाद्य विहितस्तत्पुत्राः! किं करोम्यहम्॥ 140

एवं तयोक्ता राक्षस्या पुत्रास्ते तामथाब्रुवन्।
ज्ञातापनीते रोगेऽस्मिन्किं स राजाम्ब! जीवति?॥ 141

कथं च तादृशो रोगो वद तस्यापनीयते।
एवमुक्तवतस्तान्सा तनयान्राक्षसी जगौ॥ 142

ज्ञातापनीते रोगेऽस्मिञ्जीवत्येव स भूपतिः।
श्रूयतां च यथा सोऽस्य महारोगोऽपनीयते॥ 143

शिरः पूर्वं घृताभ्यक्तं तस्य न्यस्तोष्णसर्पिषा।
कृत्वा मध्याह्नकठिने स्थापितस्यातपे चिरम्॥ 144

निवेश्य कर्णकुहरे सुषिरां वंशनाडिकाम्।
शीताम्बुघटपृष्ठस्थशरावच्छिद्रसङ्गिनीम्॥ 145

तेन स्वेदातपक्लान्ता निर्गत्यास्य शिरोन्तरात्।
कर्णरन्ध्रेण तेनैव वंशनाडीं प्रविश्य ताम्॥ 146

घटे शीताभिलाषिण्यः शतपद्यः पतन्ति ताः।
एवं स नृपतिस्तस्मान्महारोगाद्विमुच्यते॥ 147

इत्युक्त्वा राक्षसी पुत्रान्वृक्षस्थान्विरराम सा।
कीर्तिसेना च तत्सर्वमशृणोत्कोटरस्थिता॥ 148

श्रुत्वा च चिन्तयामास निस्तरिष्यामि चेदितः।
तद्गत्वैवैतया युक्त्या जीवयिष्यामि तं नृपम्॥ 149

एतामेवाटवीं सोऽल्पशुल्कः प्रान्तस्थितोऽवति।
तत्सौकार्यच्च वणिजः सर्वे यान्त्यमुना पथा॥ 150

एतत्समुद्रसेनोऽपि स्वर्गामी सोऽब्रवीद्वणिक्।
तदेतेनैव मार्गेण स मे भर्ताऽऽगमिष्यति॥ 151

अतो गत्वाटवीप्रान्ते वसुदत्तपुरे नृपम्।
रोगादुत्तार्य तत्रस्था प्रतीक्षे भर्तुरागमम्॥ 152

एवं विचिन्तयन्ती सा कृच्छ्रात्तामनयन्निशाम्।
प्रातर्नष्टेषु रक्षःसु निरगात्कोटरात्ततः॥ 153

क्रमात्ततोऽटवीमध्ये यान्ती पुरुषवेषभृत्।
प्राप्तेऽपराण्हे **गोपालमेकं** साधुं ददर्श सा॥ 154

तत्सौकुमार्यदूराध्वदर्शनार्द्रीकृतं च तम्।
पप्रच्छोपेत्य सा कोऽयं प्रदेशः कथ्यतामिति॥ 155

सोऽपि गोपालकोऽवादीद्वसुदत्तस्य भूपतेः।
वसुदत्तपुरं नाम पुरमेतत्पुरः स्थितम्॥ 156

राजापि स महात्मात्र मुमूर्षुर्व्याधितः स्थितः।
तच्छ्रुत्वा कीर्तिसेना तं गोपालकमभाषत॥ 157

यदि मां नयते कश्चिद्राज्ञस्तस्यान्तिकं ततः।
अहं तं तस्य जानामि निवारयितुमामयम्॥ 158

तच्छ्रुत्वैवावदद्गोपः पुरेऽत्रैव व्रजाम्यहम्।
तदायाहि मया साकं यावद्यत्नं करोमि ते॥ 159

तथेत्युक्तवतीं तां च कीर्तिसेनां तदैव सः।
वसुदत्तपुरं गोपः पुंवेषां नयति स्म ताम्॥ 160

तच्च तत्र तथा वस्तु निवेद्यार्ताय तत्क्षणात्।
प्रतीहाराय कल्याणलक्षणं तां समार्पयत्॥ 161

प्रतीहारोऽपि राजानं विज्ञाप्यैव तदाज्ञया।
प्रवेशयामास स तां तस्यान्तिकमनिन्दिताम्॥ 162

राजा च सोऽत्र रोगार्तस्तां दृष्ट्वैवाद्भुताकृतिम्।
आश्वस्तो वसुदत्तोऽभूद्**वेत्त्यात्मैव हिताहितम्**॥ 163

उवाच चैतां पुंवेषां यदीमामपनेष्यसि।
रुजमेतत्प्रदास्यामि राज्यार्धं ते सुलक्षण!॥ 164

जाने जहार पृष्ठान्मे स्वप्ने स्त्री कृष्णकम्बलम्।
तन्निश्चितमिमं रोगं हरिष्यति भवान्मम॥ 165

तच्छ्रुत्वा कीर्तिसेना तं जगादाद्य दिनं गतम्।
देव श्वस्तेऽपनेष्यामि रोगं मा स्माधृतिं कृथाः॥ 166

इत्युक्त्वा मूर्ध्नि राज्ञोऽस्य गव्यं घृतमदापयत्।
तेन तस्याययौ निद्रा ययौ सा चातिवेदना॥ 167

भिषग्रूपेण देवोऽयं पुण्यैर्नः कोऽप्युपागतः।
इति तत्र च तां सर्वे कीर्तिसेनां ततोऽस्तुवन्॥ 168

महादेवी च तैस्तैस्तामुपचारैरुपाचरत्।
नक्तं वेश्म पृथक्चास्याः सदासीकमकल्पयत्॥ 169

अथापरेद्युर्मध्याह्ने मन्त्रिष्वन्तःपुरेषु च।
पश्यत्सु तस्य भूपस्य कीर्तिसेना चकर्ष सा॥ 170

शिरसः कर्णमार्गेण सार्धं शतपदीशतम्।
राक्षस्युदितया पूर्वं युक्त्याऽत्यद्भुतया तया॥ 171

स्थापयित्वा च घटके सा ताः शतपदीस्ततः।
घृतक्षीरादिसेकेन तं नृपं समतर्पयत्॥ 172

क्रमात्तस्मिन्समाश्वस्ते रोगमुक्ते महीपतौ।
घटे तान्प्राणिनो दृष्ट्वा को न तत्र विसिष्मिये॥ 173

राजा च स विलोक्यैतान्कुकीटान्मूर्धनिर्गतान्।
तत्रास दध्यौ मुमुदे मेने जन्म निजं पुनः॥ 174

कृतोत्सवश्च स स्नातः कीर्तिसेनामपूजयत्।
तामनादृतराज्यार्धां ग्रामहस्त्यश्वकाञ्चनैः॥ 175

देवी च मन्त्रिणश्चैतां हेम्ना वस्त्रैरपूरयन्।
प्रभुप्राणप्रदोऽस्माकं पूज्यो भिषगसाविति॥ 176

सा च तस्यैव राज्ञस्तान्हस्तेऽर्थान्संप्रति न्यधात्।
कंचित्कालं व्रतस्थोऽहमित्युक्त्वा भर्त्रपेक्षिणी॥ 177

ततः संमान्यमानात्र सर्वैः कान्यप्यहानि सा।
यावत्पुरुषवेषेण कीर्तिसेनावतिष्ठते॥ 178

तावच्छुश्राव लोकात्तं वलभीतः समागतम्।
सार्थवाहं पथा तेन देवसेनं निजं पतिम्॥ 179

पुरि तत्राथ तं सार्थं प्राप्तं बुद्ध्वैव साऽभ्यगात्।
भर्तारं तमपश्यच्च मयूरीव नवाम्बुदम्॥ 180

चित्तेनेव चिरौत्सुक्यसंतापप्रविलायिना।
दत्तार्घानन्दबाष्पेण पादयोस्तस्य चापतत्॥ 181

सोऽपि प्रत्यभ्यजानाच्च वेषच्छन्नां निरूप्य ताम्।
भर्ता भास्वत्करालक्ष्यां दिवा मूर्तिमिवैन्दवीम्॥ 182

तस्य तद्वदनेन्दुं च चन्द्रकान्तस्य पश्यतः।
देवसेनस्य हृदयं चित्रं न गलति स्म यत्॥ 183

अथास्यां कीर्तिसेनायामेवं प्रकटितात्मनि।
किमेतदिति साश्चर्यं स्थिते तस्मिंश्च तत्पतौ॥ 184

विस्मिते च वणिग्ग्रामे तद्बुद्ध्वैव सविस्मयः।
स राजा वसुदत्तोऽत्र स्वयमेव किलाययौ॥ 185

तेन पृष्टा च सा कीर्तिसेना पत्युः पुरोऽखिलम्।
श्वश्रूदुश्चरितोत्पन्नं स्ववृत्तान्तमवर्णयत्॥ 186

देवसेनश्च तच्छ्रुत्वा तद्भर्ता स स्वमातरि।
पराङ्मुखोऽभवत्कोपक्षमाविस्मयहर्षवान्॥ 187

**भर्तृभक्तिरथारूढाः शीलसंनाहरक्षिताः।**
**धर्मसारथयः साध्व्यो जयन्ति मतिहेतयः॥** 188

इति तत्र स्थितोऽवादीदाकर्ण्यैव तदद्भुतम्।
चरितं कीर्तिसेनायाः सानन्दः सकलो जनः॥ 189

राजाप्युवाच पत्यर्थमाश्रितक्लेशयानया।
सीतादेव्यपि रामस्य परिक्लेशवहा जिता॥ 190

तदेषा धर्मभगिनी मम प्राणप्रदायिनी।
इत्युक्तवन्तं तं भूपं कीर्तिसेनाऽथ साऽब्रवीत्॥ 191

देव! त्वत्प्रीतिदायो यस्तव हस्ते मम स्थितः।
ग्रामहस्त्यश्वरत्नादिः स मे भर्त्रे समर्प्यताम्॥ 192

एवमुक्तस्तया राजा दत्त्वा ग्रामादि तस्य तत्।
तद्भर्तुर्देवसेनस्य प्रीतः पट्टं बबन्ध सः॥ 193

अथ नरपतिदत्तैस्तैर्वणिज्यार्जितैश्च
प्रसभभरितकोषो देवसेनो धनौघैः।
परिहृतजननीकः संस्तुवन्कीर्तिसेनां
कृतवसतिरमुष्मिन्नेव तस्थौ पुरे सः॥ 194

सुखमपगतपापश्वश्रुकं कीर्तिसेना-
प्यसमचरितलब्धख्यातिरासाद्य तत्र।
न्यवसदखिलभोगैश्वर्यभागान्तिकस्था
सुकृतफलसमृद्धिर्देहबद्धेव भर्तुः॥ 195

**एवं विषह्य विधुरस्य विधेर्नियोगं**
**आपत्सु रक्षितचरित्रधना हि साध्व्यः।**
**गुप्ताः स्वसत्त्वविभवेन महत्तमेन**
**कल्याणमादधति पत्युरथात्मनश्च** ॥ 196

इत्थं च पार्थिवकुमारि भवन्ति दोषाः
श्वश्रूननन्दृविहिता बहवो वधूनाम् ।
तद्भर्तृवेश्म तव तादृशमर्थयेऽहं
**श्वश्रूर्न यत्र न च यत्र शठा ननन्दा** ॥ 197

इतीदमानन्दिकथाद्भुतं सा मुखान्निशम्यासुरराजपुत्र्याः।
**सोमप्रभाया** मनुजेन्द्रपुत्री **कलिङ्गसेना** परितुष्यति स्म॥ 198

ततो विचित्रार्थकथावसानं दृष्ट्वेव गन्तुं मिहिरे प्रवृत्ते।
सोत्कां समालिङ्ग्य कलिङ्गसेनां सोमप्रभा स्वं भवनं जगाम॥

**इति श्रीकाश्मीरक-महाकविश्रीसोमदेवभट्टविरचिते कथासरित्सागरे मदनमञ्चुकालम्बके कीर्तिसेनाख्यायिका तृतीयस्तरङ्गः॥**